चतुर्थोऽध्यायः

उपनिषदां–

कर्मसिद्धान्ताः

चतुर्थोऽध्यायः

उपनिषदां कर्म सिद्धान्ताः

प्रथमो विरामः –प्रधानोपनिषत्सु कर्म विषयक मंत्राः

द्वितीयो विरामः –कर्मविषयक मंत्राणां समीक्षणम्

तृतीयो विरामः –कर्म परिभाषा

चतुर्थो विरामः –कर्म भेदाः

पंचमो विरामः –कर्म विषये व्याख्या

(भाष्यकाराणां मतम्)

1. श्री मच्छंकराचार्यमतम्
2. श्री रामानुजाचार्यमतम्
3. श्री मध्वाचार्यमतम्
4. श्री निम्बार्काचार्य मतम्
5. श्री वल्लभाचार्य मतम्

प्रथमो विरामः

प्रधानोपनिषत्सु कर्म विषयक मंत्राः

अथो अयं वा आत्मा। अत्राविद्वान वर्णाश्रताद्यभिमानो धर्मेण नियम्यमानो देवादिकर्मकर्तव्यातया पश्रुवत्परतन्त्र इत्युक्तम्। कानि पुनस्तानि कर्मणि यत्कर्तव्यतया पशुवत् परतन्त्रो भवति ? के वा तेदेवादयो तेषां कर्मभिः पशुवदुपकरोति ? इति तदुभयं प्रपञ्चयति–

अथो अयं वा आत्मा सर्वेषां भूतानां लोकः स यज्जुहोसि यद्यजते तेन देवानां लोकोऽयं यदनुब्रूते तेन ऋषीणामथ यत्पितृभ्यो निपृणाति यत्प्रजामिच्छते तेन पितृणामय यन्मनुष्यान्वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणामय यत्पशुभ्यस्तृणोदकं विन्दति तेन पशूनां यदस्य गृहेषु श्वापदा वयाँ–स्या पिपीकिाभ्य उपजीवन्ति तेन तेषां लोको यथा ह वे स्वाय लोकायारिष्टमिच्छेदेवगुं हैवंविदे सर्वाणि भूतान्यरिष्टमिच्छन्ति तद्वा एतद् विदितं मीमांसितम्।। 16।।

आत्मैवेदमग्न आसीदेक एव सोऽकामयत जाया मे स्यादय प्रजायेयाय वित्तं मे स्यादय कर्म कुर्वीयेत्येतावान्यै कामो नेच्छंगुंश्चन्तो भूयो विन्देत्स्मादप्येतहर्तेकाकी कामयते जाया मे स्यादय प्रजायेयाथ वित्तं मे स्यादय कर्म कुर्वीयेति स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्सन एव तावन्मयते तस्यो कृत्सनता मन एवास्यात्मा वाञ्जाया प्राणः प्रजा चक्षुर्मानुषं वित्तं चक्षुषा हि तन्दिते श्रौतं दैव गुं श्रोत्रेण हि तच्छृणोत्यात्यैवास्य

कर्मात्मना हि कर्म करोति स एष पाङ्क्तमिदं गुं सर्वं यदिदं किञ्च तदिद गुं सर्वमाप्नोति य एवं वेद।। 17।।

एवं साध्यलोकत्रयफलभेदेन विमियुक्तानि पुत्रकर्मविद्याख्यानि त्रीणि साधनानि। जाया तु पुत्रकर्मार्थत्वान्न पुथकसाधनमिति पृथङ्नाभिहिता। वित्तं च कर्मसाधनत्वान्न पृथकसाधनम्।

विद्याकमैणोलोकजयहेतुत्व स्वात्मप्रतिमामेनैव भवतीति प्रसिद्धम्। पुत्रस्य त्वक्रियात्मकत्वात्वकेन प्रकारेण लोकजयहेतुत्वमिति न ज्ञायते। अतस्तद्वक्तव्यमित्यथानन्तरमारभ्यत।

अथातः सम्प्रतिवेदाः प्रैष्यन्मन्यतेऽयं पुत्रमाह त्वं ब्रह्म त्वं यज्ञसत्वं लोक इति स पुत्रः प्रत्याहांह ब्रह्माहं यज्ञोऽहं लोक इति यद्वै किञ्चानूक्तं तस्य सर्वस्य गुं सर्वेषां यज्ञ इत्येकता ये वै के च लोकस्तेषां गुं सर्वेषां लोक इत्येकर्तताविद्वा इदं सर्वमेतन्मा सर्वं गुं सन्नयमितोऽनुजादिति तस्मात्पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेन –मनुशासति स यदैवंविदस्माल्लोात्प्रैत्ययैभिरेव प्राणैः सह पुत्रमाविशति। स यद्यनेन किञ्चिदक्ष्णयाऽकृतं भवति तस्मादेन –ँगुं सर्वस्मात्पुत्रो मुञ्चति तस्मात्पुत्रो नाम स पुत्रेणैवास्मैंल्लोके प्रतितिष्ठत्यथैनमेते दैवः प्राणा अमुता अविशन्ति।।17।।

केचितु पितृलोकदेवलोकजयोऽपि पितृलोकदेवलोकाभ्यां व्यावृत्तिरेवः, तस्मात्पुत्रकर्मापराविद्याभिः समुच्चित्यानुष्ठिताभिस्त्रिभ्य एतेभ्यो लोकेभ्यो व्यावृत्तः परमात्मविज्ञानेन मोक्षमधिगच्छतीति मोक्षार्थान्येव

पुत्रादिसाधनानिच्छन्ति। तेषामपि मुखा:पिधानायेयमेव श्रुतिस्तरा कृतसम्प्रतिकस्य पुत्रिण: कर्मिण: त्र्यन्नात्मविद्याविद: फलप्रदर्शनाय प्रवृत्ता।

पृथिव्यै चैनमग्नेश्च दैवी वागाविशति सा वै देवी वाग्यया यद्यमेव वदित तत्तद्भवति।। 18।।

दिवश्चनमादित्याच्च दैवं मन आविशति तद्वै दैवं मनो येनान्न्द्येव भवत्ययो न शोचति।। 19।। तथा --

अभ्दयश्चैपं चन्द्रमसश्च दैव: प्राण: आविशति स वै देव: प्राणो: य: सञ्चर: गुंश्च न व्यथतेऽयो न रिष्यति। स एवंवित्सर्वेषां भूतानामात्मा भवति। यथैषा देवतैव गुं स यथैता देवता गुं सर्वाणि यदु किञ्चेमा: प्रजा: शोचन्त्यमैवासां तदूभवति पुण्यमेवामुं गच्छति न ह वै देवान्पापं गच्छति।।20।।

अथ कर्मणामात्मेत्येत्येतदेषामुक्यमतो हि सर्वाणि कर्माण्युत्तिष्ठन्त्येदेषा गुं सामैतद्धि सर्वै: कर्मभि: सममेतदेषां ब्रह्मैतद्वि सर्वाणि कर्माणि बिर्भति तदेतत्त्रय -ँगुं सदेकमयमात्मात्मो एक: सन्नेतत्त्रयं तदेतमृत-ँ गुं सत्येनच्छन्नं प्राणां वा अमृंतं नामरूपे सत्यं ताभ्यामयं प्राणश्च्दन्न:।। 3।।

आत्मना हि शरीरेण कर्म करोति।

सर्वेषां कर्म विशेषेणामात्मा शरीरं- सामान्यमात्मा:, आत्मन: कर्म आत्मेत्युच्यते।

स वा अभयामात्मा ब्रह्म विज्ञानयममयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोतमयः पुथ्वीमय आपोमय वायुमय आकाशमयस्तेजोमयोऽकाममयः क्रोधमयो धर्ममयोऽधर्ममयः सर्वमयस्तद् यदेतदिमयोऽदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन। अथो यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत् कर्म कुरुते यत् कर्म कुरुते तदभि सम्पद्यते।।5

''यद्यद्वि कुरुते कर्म तत्तम् कामस्यचेष्टितम्'' इति स्मरणात्।

यो ज्ञानकर्मसमुच्चयकारी सोऽन्तकाल आदित्यं प्रार्थरूति, अस्ति च प्रसङ्गः गायात्र्यास्तुरीयः पादो हि सः। तदुपस्थानं प्रकृतम्, अतः स एव प्रार्थयेत।

हिरण्यमयेन पात्रेण सत्यापिहितं मुखम्। तत्वं पूषन्नपावृणु सत्यधर्माय दृष्टये। पूषान्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्। समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि। योऽसावसौ पुरुषः सोऽहमस्मि। वायुरनिलममृतमथेदं भस्मान्त ँ स्मर। अग्नं नय सुपथाशये अस्मान् विश्वान् देव वायुनाकन विद्वान युयोध्यस्मज्जहुराणमेनो भूमिष्ठां ते नमोक्तिं विधेम।।1

स यः कामयते–ज्ञानकर्मयोगीतिरक्ता। तत्र ज्ञानं स्वतन्त्रं कर्म तु दैवमानुषवित्तद्वयायत्तं तेन कर्मार्थं वित्तमुपाजनीयम्। तच्चाप्रत्ययवायकारिणोपायेनेति तदर्थं मन्थाक्ष्यं कर्मारभ्यते महत्वं प्राप्तये, महत्वे च सत्यर्थसिद्धं हि वित्तम्, तदुच्यते--

स यः कामयते महत् प्राप्नुयामित्युदगवन आपूर्यमाणपक्षस्य पुण्याहे द्वादशाहमुपसद्वगती भूत्वैदुम्बरे क ँ से चमसे वा सर्वौषधं फलानीति संभूत्य परिसमुहन परिलिव्याग्निमुपसमाधाय परिस्तीर्यावृताज्य ँ स ँ स्कृत्य पु ँ सा नक्षत्रेण मन्थ ँ संनीय जुहेति। यावन्तो देवास्त्वयि जातवेदस्तिर्यच्चो ध्वनित पुरुषस्य कामान्। तैभ्योऽहं भागधेयं जुहोमि ते मा तृप्ताः सर्वे कामैस्तर्पयन्तु स्वाहा। तिरश्चा निपद्यतेऽहं विधरणी इति तां त्वा धृतस्य धारया यजे स ँ राधनीमिह ँ स्वाहा।। 1।।

ये ते कर्मणः कर्मनिष्ठाः कर्म कुर्वन्ति एव जिजीविषावस्तेभ्य इदमुच्यते --

अन्धन्तम् प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते य उ विद्याया ँ रताः।।[1]
अन्यदेवाहुर्विद्याान्यदाहुरविद्यया।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरो।।[2]
विद्याां चाविद्यां च यस्तद्वेदोभय ँ सह।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।।[3]

तस्यै तपो दमः कर्मति प्रसिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनम्।।[4]

---

1. केनोपनिषद - 10
2. केनोपनिषद - 11
3. केनोपनिषद - 12
4. केनोपनिषद

जानाम्यह- शेषधिरित्यनित्यं

न ह्यघ्रुवैः प्राप्यते हि घ्रुवं तत्।

ततो मया नाचिकेतश्चितोऽग्नि

रनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम्।।[1]

मुण्डकोपनिषदि द्वितीयखण्डे कर्मनिरूपण :--

तत्रापरविद्याविषयः कर्त्रादि साधनक्रियाफलभेदरूपः संसारोऽनादिः अनन्तो दुःखस्वरूपत्वाद्वातव्यः प्रत्येकं शरीरिभिः सामस्त्येन नदीस्रोतोवदव्यच्छेदरूप -सम्बन्धः, तदुपशमलक्षणो मोक्षः पराविद्याविषयोऽनाद्यन्तोऽजरोऽमरोऽष्मृतोऽ-भयः शुद्धः प्रसन्नः स्वात्मप्रतिष्ठालक्षणः परमानन्दोऽद्वय इति।

पूर्वं तावदपराविद्याया विषयप्रदर्शनार्थमारम्भः। तद्वर्शने हि तन्निवदोपपत्तेः। तथा च वक्ष्यति-परीक्ष्यलोकान्कर्मचितान्'[2] इत्यादिन। न हत्प्रदर्शिते परीक्षोपपद्यत इति तत्प्रदर्शयतन्नाह --

तदेतत्सत्यं मन्त्रेषु कर्मणि कवयो

यान्यपश्यंस्तामि त्रेतायां बहुधा सन्ततानि।

तान्याचरथ नियतं सत्यकामा एष वः

पन्थाः सुकृतस्य लोके।।[3]

---

1. केनोपनिषद
2. मुण्डको. 1/2/12
3. मुण्डको.

तत्रग्निहोत्रमेव तावत्प्रथमं प्रदर्शनार्थमुच्यते सर्वकर्मणां प्राथम्यात्। तत्कथम् ?

यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने।

तदाज्य भागावन्तरेणाहुतिः प्रतिपादयेत्।।[1]

मुण्डकोपनिषदि द्वितीयखण्डे विधिहीन कर्मस्य कुफलम् :--

एष सम्यगाहुतिप्रक्षेपादिलक्षणः कर्ममार्गेण लोक प्राप्तये पन्थास्तस्य च सम्यक्करणं दुष्करम् विपत्तयस्तवनेका भवन्ति। कथम ?

यस्याग्निहोत्रमदर्शमपौर्णमास
मचातर्मास्यमनाग्रयणमतिथिवर्जितं च।
अहुतमवैश्वदेवमविधिना हुत-
मासप्तमांस्तस्य लोकान्हिनस्ति।।[2]
काली कराली च मनोजव च
सुलोहिता या च सुधूम्रवर्णा।
स्फुलिङ्गनी विश्वरूचि च,
देवीलेलायमाना इति सप्त जिह्वाः।।[3]

---

1. मुण्डको.
2. मुण्डको.-2/3
3. मुण्डको.-2/4

एतेषु यश्चरते भ्राजमानेषु

यथाकालं चाहुतयो ह्यादद्यायन्।

तं नयन्त्येताः सूर्यस्य रश्मयो

यत्र देवानां पतिरेकोऽधिवासः।।[1]

मुण्डकोपनिषदि द्वितीयखण्डे- ज्ञानरहितं कर्मैतावत्फलम् :--

एतच्च ज्ञानरहितं कर्मैतावत्फलमविद्याकाम कर्मकार्यमतोऽसारं दुःखमूलामिति निन्द्यते --

प्लवा लेते अदृढा यज्ञरूपा

अष्टादशोक्तमवरं येषु कर्म।

एतच्छ्रेयो येऽभिनन्दति मूढा

जरामृत्यु ते पुनरेवापि यान्ति।।[2]

किञ्च --

अविद्यायामन्तरे वर्तमानाः

स्वयं धीराः पण्डितं मन्यमानाः।

जङ्घन्यमानाः परियन्ति मूढा

अन्धेनैव नीयमाना यथान्धाः।।[3]

---

1. मुण्डको. - 2/5
2. मुण्डको. - 2/7
3. मुण्डको. 2/8

किञ्च --

अविद्यायां बहुधा वर्तमाना

वयं कृतार्था इत्यभिमन्यन्ति बालाः।

यत्कर्मिणो न प्रवेदयन्ति रागा-

त्तेनातुराः क्षीणलोकाश्च्यवन्ते।।[1]

इष्टापूर्तं मन्यमाना वरिष्ठं

नान्यच्छ्रेयो वेदयन्ते प्रमूढाः।

नाकस्य पृष्ठे सुकृतेऽनुभूत्वे-

मं लोकं हीनतरं वा विशन्ति।।[2]

तपः श्रद्धे ये लुपवसन्त्येरण्ये

शान्ता विदूवांसो भैक्ष्यचर्या चरन्तः।

सूर्यद्वारेण ते विरजाः प्रयान्ति

यत्रामृतः स पुरुषो हृयव्यात्मा।।[3]

मुण्डकोपनिषदि द्वितीय मण्डूके प्रथमखण्डे :--

किं च कर्मसाधनानि फलानि च तस्मादेवेत्याह कथम्

---

1. मुण्डको.- 2/9
2. मुण्डको. - 2/10
3. मुण्डको. - 2/11

तस्मादृचः साम यजूंषि दीक्षा

यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च।

संवत्सरश्च यजमाश्च लोकाः

सोमो यत्र पवते यत्र सूर्यः।।[1]

तस्माच्च देवा बहुधा सम्प्रसूताः

साध्या मनुष्याः पशवो वयांसि।

प्राणापानौ ब्रीहियवौ तपश्च

श्रद्धा सत्यं ब्रह्मचर्य विधिश्च।।[2]

तैत्तिरीयोपनिषदि प्रथम वल्ल्यां नवमानुवाकेः--

विज्ञानादेवाप्नोति स्वाराज्यमित्युक्त्वाच्छ्रौतं स्मार्तानां कर्मणामानर्थक्यं प्राप्तमित्यतस्तन्मा प्रापदिति कर्मणां पुरुषार्थं प्रति साधनत्वप्रदर्शनार्थमिहोपन्यासः --

ऋतं च स्वाध्यायप्रवचने च।

सत्यं च स्वाध्यायप्रवचने च।

तपश्च स्वाध्यायप्रवचने च।

शमश्च स्वाध्यायप्रवचने च।

दमश्च स्वाध्यायप्रवचने च।

---

1. मुण्डको. 2/9/9
2. मुण्डको.

अग्नयश्च स्वाध्यायप्रवचने च।

अग्निहोत्रं च स्वाध्यायप्रवचने च।

अतिथियश्च स्वाध्यायप्रवचने च।

मानुषं स्वाध्यायप्रवचने च।

प्रजा च स्वाध्यायप्रवचने च।

प्रजश्च च स्वाध्यायप्रवचने च।

प्रजातिश्च च स्वाध्यायप्रवचने च।

सत्यमिति सत्यवचा राशीतरः।

तपः इति तपोनित्यं पौरुशिष्टः स्वाध्यायप्रवचने एवेति नाको भौद्गल्यः। तद्धि तपस्तद्धि तपः।।[1]

यत्क्रतुर्भवति यादृक्कामकार्येण क्रतुना यथारूपः क्रतुस्य सोऽयं यत्क्रतुर्भवति, तत् कर्म कुरुते यद्विषयः क्रतुस्तत्फलनिवृत्तये यद् योग्यं कर्म, तत् कुरुते निर्वर्तयति, यत् कर्म कुरुते तदभिसम्पद्यते तस्मात् सर्वमयत्वेऽस्य संसारित्वे च काम एव हेतुरिति।।

तदेष श्लोको भवति। तदेव सक्तः सह कर्मणैति लिङ्ग मनो यत्र निषक्तमस्य। प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्यम। तस्माल्लोकात् पुनरैत्यस्मै लोकाय कर्मण इति तु कामयमानोऽथाकामयमानो योऽष्कामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति।।[2]

---

1. तैत्तरीय. **2.** तैत्तरीय.

यथोक्तं प्राणदर्शनविद इदं मन्थाख्यं कर्मारभ्यते।

अथ यदि महज्ज्रिमिषेदमावास्यायां दीक्षित्वा पौणैमास्य-ँरात्रौ सर्वौषधस्य मन्थं दधिमधुनोरुपमथ्य ज्येष्ठाय श्रेष्ठाय स्वाहेत्यगूवाज्यस्य हुत्वा मन्थे संपातमवनयेत्।।[1]

वसिष्ठाय स्वाहेत्यग्नावाजस्य हुत्वा मन्थे संपातमवनयेत्प्रतिष्ठायै स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत्संपदे येदायतनाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सुपातमवनयेत्।।[2]

अथ प्रतिसृप्याञ्जलौ मन्थमाधाय जपत्ययो नामास्यमा हि ते सर्वामिदं-ँ स हि ज्येष्ठः श्रेष्ठो राजधिपतिः स मा ज्यैष्ठ्य-ँ श्रैष्ठ्य-ँराज्यमधिपत्यं गमयत्वहमेवेद-ँसर्वमसानीति।।[3]

अथ खल्वेतयर्चा पच्छ आचामति। तत्सवितुर्वृणीमह इत्याचाति वयं दैवस्य भोजनमित्याचामति। श्रेष्ठं-ँसर्वधातममित्याचामति। तुरं भगस्य धीमहीनि सर्वं पिबति। निर्णिज्य क-ँसं चमसं वा पश्चादग्नेः संविशति चर्मणि वा स्थण्डिले वा वाचंयंमोऽप्रसाहः। स यदि स्त्रियं पश्येत्समृद्धं कर्मेति विद्यात्।।[4]

---

1. तैत्तरीय - 1/9/8

2. तैत्तरीय. - 1/9/5

3. तैत्तरीय. 1/9/6 **4.**तैत्तरीय. 1/9/7

तदेष श्लोका यदा कर्मसु कामयेषु स्त्रिय-ँस्वप्नेषु पश्यति समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने तस्मिन्स्वप्न निदर्शने।।[1]

कर्मविषयक मंत्राणां समीक्षणम् :--

कुर्वन्नेहवेह कर्मणि जिजीविषेच्छत-ँसमाः।

एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।[2]

ईशावास्योपनिषत्

एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनाऽऽत्मज्ञाननिष्ठतया रक्षितव्य इत्येष वेदार्यः। अथेतरस्यानात्मतयाऽऽत्मग्रहणायाशक्तस्येदमुपदिशति मन्त्रः। कुर्वन्नेह इह निर्वर्तयन्नेव कर्माण्यग्निहोत्रादीनि जिजीविषेज्जी-वितुमिच्छेच्छतं शत संख्यकाः समाः संवतसरान्। वावद्धि पुरुषस्य परमायुनिरुपितम्। तथा च प्राप्तानुवादेनयज्जी -विषेच्छतं वर्षाणि तत् कुर्वन्नेव कर्मणीत्येतद्विधीयते।।

अत्र कुर्वन्नेव जिजीविषेदति न विधिः जीवनेचछायाः राग प्राप्तवत् अपितु तु यदि जिजीविषेत् तदा कुर्वन्नेव जिजीविषेदिति इच्छामनूद्य कर्मकरणं विधयते। पूर्वमन्त्रस्य तु मा गृध इति इच्छा-

---

1. तैत्तरीय. 1/9/8
2. तैत्तरीय. 1/9/2

निषेधात् संन्यासिनविषयत्वम्। अस्य तु इच्छानुवादात् गुहस्थविषयत्वं न स्पष्टमेवै ततो मन्त्रयोर्भिन्न विषयतवत् ब्रह्मविद एव कर्मविधरसि न युक्तम्। 'स्तुतयेऽनुमतिर्वा'' ((इति ब्रह्मसूत्रे तु यद्यप्यत्र प्रकरण सामर्थ्यात विद्वानेव कुर्वन्न्त्यभिसम्बन्ध्ते तथापि विद्यास्तुतये कुर्मनुज्ञानमेतदित्युक्तम्। तावता न ज्ञानकर्मसमुच्च्यः सिद्धयेत।।

एवमेवम्प्रकारेण त्वयि जिजीविषति नरे नरमात्राभिमानिनीत एतस्मादग्निहोत्रादीनि कर्मणि कुर्वतो वर्तमानात्प्रकारादन्याथाप्रकारान्तरं नास्ति येन प्रकारेणाशुभं कर्म न लिप्यते कर्मणा न लिप्यत इतयर्थः। अतः शास्त्रविहितानि कर्मण्यग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत्।

कथं पुनरिदमवग्म्यते पूर्वण मंत्रेण सन्यासिनो ज्ञाननिष्ठोक्ता द्वितीयेन तदशक्तस्य कर्मनिष्ठेति।

उच्यते ; ज्ञानकर्मविरोधं पर्वतवदकम्प्यं यथोक्तं न स्मरसि किम्! इहाप्युक्तं 'यो हि जिजीविषेत् स कर्म कुर्वन्' 'ईशावास्यमिदं सर्वम्' 'तेन त्रूक्तेन भुञ्जीथाः' 'मा गृधः कस्यास्विद्धनम्' इति च । न जीविते मरणे वा गृधिं कुर्वीतारण्यमियादिति च पदम्ः ततो न पुनरियात् इति सन्यासशासनात्। उभयोः फलभेदं च वक्ष्यति।

इमौ द्वायेव पन्थानावनुनिष्क्रान्तरौ भवतः क्रियात्यागः। तयो संन्यासपथ एवातिरेचयति। ''न्यास एवात्यरैचयत्'' इति च तैत्तिरीयके।

द्वाविमावथ पन्थानौ

यत्र वेदाः सुप्रतिष्ठिताः।

प्रवृत्तिलक्षणो धर्मो

निवृतश्च विभावितः।।[1]

इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्येण भगवता। विभागञ्चानयेतः दर्शयिष्यामः।।[2]

पूर्वमन्त्रेण ज्ञानं विहितं यस्य तस्यैवोत्तरमन्त्रेण कर्म विहितं ततः समुच्चयानुष्ठाने तातपर्यं मन्त्रद्वयस्येकदेशिशङ्कमुद् भावयति। शुद्धब्रह्मज्ञानकर्मणा नैकाधिकारे विरुद्धत्वादृतुगमन त्रिदण्डिधर्मवत्। अस्त्येव तत्रापि क्रमेणैककतृकत्वमिति चेन्न।

विशिष्टरूपभेदादभिन्नाधिकारत्वात्ज्ञानकर्मणोर्वेदविहितत्वेन शुद्धिसाम्याद् -विरोधोऽसिद्ध इति तदसत्। ऋतुगमनत्रिदण्डधर्मयोरप्या -विरोधप्रसङ्गात्। तदुभर्य नैकस्य विहितमिति चेत्तुल्यमेतत। प्रसिषेधातत्र न समुच्चय इति चोदहापि न कर्मणा न प्रजया।

---

1. महा.शा. 241/61
2. उपनिषत् भाष्यम, शंकराचार्य, पृ.-5

नानुध्यायाद्बहुञ्छादनि त्यादिप्तषेधस्तुल्यः। केवलकर्मविषयोनिषेध इति न च वाच्यं केवलपदव्यवच्छेद्याभावात्समुच्चयकतृत्वाद्यध्या- यासाश्रयं कर्म शुद्धत्वाकर्तृतवादि ज्ञानेनोपमृत इति सम्बन्धग्रन्थे यथोक्तं सहानवस्थानलक्षणं विरोधं किं न स्मरसि येनैकाधिकारत्वं तयोः कल्पयसीत्यर्थः। मन्त्रालिङगदपि तयोर्भिन्नाधिकारत्वं प्रतीयत इत्याह। जिजीविषो विहितः। किञ्च धनकाङक्षानिषेधेन कर्मधिकारनिषेधः प्रतीयत् इत्यर्थः। जिजीविषा हि कर्मधिकारिण एव न ज्ञानधिकारिण इत्यत्र प्रमाणमाह। अरण्यं स्त्रीजनासङकीर्णमाश्रममियाद्गच्छैदति पदं वेदशास्त्रसिथतस्ततोऽरण्य -वासोपलक्षितात्संन्योसन्न पुनरियात् कर्मश्रद्धया न प्रत्यावृत्तिं कुर्यादिति जिजीविषादिरहितस्य सन्यासविधानादित्यर्थः। इतश्च नैकफलकामस्य ज्ञानकर्मणोराधिकारः प्रतिपत्तव्यः इत्याह। को मोहः कः शोक एकत्वमनुपश्यत इति समिदानानर्थ प्रहाणं ज्ञानफलं वक्ष्यसि। संसारमण्डलान्तर्गतमेव च देशान्तरप्रत्यायत्तं हिरण्यगर्भपद -प्राप्यादिलक्षणं कर्मफलं वक्ष्यति। अग्ने नय सुपथेत्येन्तेनेत्यर्थः। नारायणोपनिषएवाक्यमपि भिन्नाधिकारित्वे प्रमाणयति। विशिष्टरूप भेदः गृहस्थत्वसंन्यासित्व विशिष्टयोर्भेदः। पुरस्तात्सृष्टिकालंऽनु- निष्क्रान्ततरौ भूतसृष्टिमनुप्रवृत्तौ -भिन्नधिकारित्वादुभयोः संन्यास एवातिरिक्तः श्रेष्ठो भवति परमपुरुषार्थाव्यव - धानादित्यर्थः। व्यासवाक्यमपि सम्वादकमाह।।[1]

---

1. श्रीमदानन्दगिर्याचार्यकृता भाष्यटीका, उपनिषद् भाष्य, पृ.-5

अनेजदेकं मनसो जवीयो

र्ननदेवा आप्नुवन्पूर्वमर्षत्।

तद्धावतोऽन्यानत्येति तिष्ठ

तस्मिन्न्पो मातरिश्वा दधाति।।[1]

यस्यात्मनो हननादविद्वांसः संसरन्ति तद्विर्प्यरूेण विद्वासों जना मुच्यन्ते ते नात्महनः, ततः कीदृशमात्मतत्वमित्युच्यते।

अनेजत् न एजत्। एजृ कम्पने कम्पनं चलनं स्वावस्थाप्रच्युतिस्तद्वर्जितं सर्वदैकरूपमित्यर्थः। तच्चैकं सर्वभूतेषु मनसः सङ्कल्पादिलक्षणाद जावीयो जववत्तरम्।

कथं विरुद्धमुच्यते। ध्रुवं निश्चलमिदं मनसो जवीय इति च नैव दोषः। निरूपाध्युपाधिमत्वेनोपपन्तेः। तत्र निरूपाधिकेन स्वेन रूपेणोच्यते अनेजदेकमिति मनसोऽन्तः करणस्य सङ्कल्पविकल्पलक्षणस्योपाधरनुवर्त्तनाद् इह देहस्थस्य मनसो ब्रह्मलोकादीन्द्रुतं गच्छति सति प्रथमं प्राप्त इवात्मचैतन्यावभासो गृहमतेऽतो मनसो जवीय इत्याह। नैनदेवा द्योतनादेवश्चक्षुरादीनिन्द्रियाण्येतत्प्रकृतमात्मातत्वं नाप्नुवन्न प्राप्तवन्तः। तेभ्यो मनो जवीयः। मनोव्यापारव्यवहारतत्वाद् आभासमात्रमपि आत्मनो नैव देवानां विषयीभवति।

---

1. उपनिषद भाष्य

यस्माज्जवनान्मनसोऽपि पूर्वमर्षत पूर्वमेव गतं व्योमवदूव्यापित्वात् सवैव्यापि तदात्मतत्वं सर्वसंसारधर्मवर्जितं स्वेन निरुपधिकेन स्वरूपेणविक्रियमेव सदुपधिकृताः सर्वाः संसारविक्रिया अनुभवतीत्य विवेकिनां मूढानांमेनकमिव च प्रतिदेहं प्रत्यभासत इत्येतदाह।

तद्धावतो द्रुतं गच्छतोऽन्यानात्मविलक्षणान्मनोवागिन्द्रिय-- प्रभृतीनत्यंती अतीव गच्छति इव। इवार्थं स्वयमेव दर्शयति तिष्ठदिति स्वयमविक्रियमेव सादित्यर्थः।

तस्मिन्नात्मतत्वे सति नित्यचैतन्यस्वभावे मातरिश्वा मातरि अन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः सर्वप्राणभूत क्रियात्मको यदाश्रयाणि कार्यकरणजातानि यस्मिन्नेतानि प्रोतानि च यत्सूत्रसंशक्त सर्वस्य जगतो विधरीयत् स मातरिश्वा अपः कर्मणि प्राणिनां चेष्टा लक्षणानि, अग्न्यादित्यपर्जन्यादीनां ज्वलनदहनप्रकाशा -भिवर्षलक्षणानि दधाति विभजति इत्यर्थः। धारयतीति वा '' भीषास्माद्वातः पवते''[1]

इत्यादि श्रुतिभ्यः। सर्वा हि कार्यकरणादि विक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थः।।[2]

---

1. तैत्तरीय. उप. - 2/8/1
2. उपनिषद् भाष्यम्, शंकराचार्य, पृ. 6/71

अविक्रियमेकं चेदात्मतत्वं कथं तर्हि केचन स्वर्ग गामिनः केचन नरकगामिन इति संसारिकव्यवस्था स्यादिति चेन्मनउपाधिनिबन्धनेयभिप्रेत्याह। उपाधारेनुवर्तनात् विक्रियादिव्यवहारा -श्रयत्वमिति शेषः। ननु मनसो देहान्तः स्थात्वाद्बहिर्गमना -योग्यत्वाकथं वेगवत्वमित्याशङ्कयाऽह। जवीयस्त्वादेश्वादिवत्तर्हि चक्षुरादिग्राह्यत्वं प्राप्तमित्याशङ्कयाऽह। चक्षुरादिप्रवृत्तेर्मनोव्यापार -पूर्वेत्वारात्तदविषयेत्वे चक्षुरादिविषयत्वामप्यात्मनो न सम्भवतात्यर्थः। मनसो वा कथं न विषयोऽत्यन्ताव्यवधानात्तथाऽत्माऽप्यन्ता व्यवधारानामनसो न विषयस्तद्व्यापकत्वाच्चैत्यर्थः। उक्तात्मसंभव -नायोपपत्तिमाह। श्रोतानि कर्मणि सोमाज्यप्यः प्रभुतिभिरद्भिः सम्पाद्यन्त इति सम्बन्धाल्लक्षिकोपशब्दः कर्मसु प्राणचेष्टायाश्चविना -मित्तत्व प्रसिद्धेः कारणवाचक शब्दः कार्ये लक्षणया प्रयुक्त इतयर्थः। ईश्वरस्यापि हिरण्यगर्भस्य नियतप्रवृत्तयन्यथानुपत्याधिष्ठाता परमेश्वरः सम्भाव्यत इत्युक्तमिदानीं मातरिश्वाग्रहणमुपलक्षणार्थ मादाय तात्पर्यमाह।।[1]

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।

ततो भूय इव ते तमो य उ विद्याया-ँरता।।[2]

---

1. श्रीसदानन्दगिर्याचार्य कृत, भाष्यटीका, उपनिषद् भाष्य, 4/6/7
2. श्रीसदानन्दगिर्याचार्य कृत, भाष्यटीका, उपनिषद् भाष्य, 4/6/9

अत्राऽद्येन मन्त्रेण सर्वैषणापरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदादिः। ''ईशा वास्यमिदं सर्वं मा गृधः कस्यस्विद्धनमै इति। अज्ञानां जिजीविषूनां ज्ञाननिष्ठासम्भवे'' कुर्वन्नेवेह कर्मणि जिजीविषेत'' इति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः।

अनयोश्च निष्ठायोविभागो मन्त्रप्रदर्शितयोर्बृहदारण्यकेपि ''सोऽकायत जाया मे स्यात्'' इत्यादिना अज्ञस्य कामिनः कर्मणीति।'' मन एवास्यात्मा वाऽञ्जाया इत्यादिनावचनाद् अज्ञत्वं कामित्वं च कर्मनिष्ठास्य निश्चितमवगम्यते। तथा च तत्फलम् सप्तान्न्सर्गस्तेषात्मभावेनात्मस्वरूपावस्थनम्।

जायाद्येषणात्रयसंन्यासेन च आत्मविदं कर्मनिष्ठाप्रतिकूल्येनात्म -स्वरूपनिष्ठेव दर्शिता ''किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः'' इत्यादिन। ये तु ज्ञाननिष्ठाः संनयासिनस्तेभ्योऽष्सुर्या नाम त इत्यादिन आविद्न्नदद्वारेण आत्मनो याथात्म्यं स पर्यगाद् इत्येतदन्तैर्मन्त्रैरूपदिष्टम्। ते ह्यत्राधिकृता न कामिन इति तथा च श्वेताधतराणां मन्त्रोपनिषदि' अत्याश्रमित्यः परमं पवित्रं प्रोवाच साम्यगृषिसङ्घजुष्टम्'' इत्यादि विभज्योक्तम्।

ये तु कर्मणिः कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषावस्तेभ्य इदमुच्यते।

कथं पुनरेचमवगम्यते न तु सर्वेषाम् इति? उच्यते-अकामिनः साध्यसाधनभेदोपमर्दन' यस्मिन सर्वाणि भूतान्यात्मैवाभूद् विजान्तः।

तत्र को मोहः कः शोक एकत्वमनुपश्यतः इति यदात्मैकत्वविज्ञानम् तन्न केनचित्कर्मणा ज्ञानान्तरेण वा ह्यमूढ़ समुच्चीषति। इह तु समुच्च्चीषया अविद्वदादिनिन्दा क्रियते। तत्र च यस्य येन समुच्चयः सम्भवति न्यायतः शास्त्रतो वा तदिहोच्यते यद्वैवं वित्तं देवताविषयं ज्ञानं कर्म सम्बन्धित्वेनोपन्यस्तं न परमात्मनज्ञज्ञनम्। विधेया देवलोकः इति पृथक्फलम्श्रवणात्। तयोर्ज्ञानकर्मणोरिह एकैकानुष्ठानुनिन्दा समुच्चीषया न निन्दापरैव उकैकस्य पृथक्फलश्रवणात् विद्यया तदारोहन्ति ''विधेया देवलोकः'' ''न तत्र दक्षिणा यन्ति'' ''कर्मणा पितृलोक'' इति। न हि शास्त्रविहितं किञ्चिद्कर्तव्यामियात्।

तत्र अन्धन्तमोऽदर्शनात्मकं तमः प्रविशन्ति। के? येऽविद्यां विद्यया अन्या तां कर्म इत्यर्थः कर्मणो विद्याविरोधित्वात्ः तामविद्यामग्निहोत्रादिलक्षणामेव केवलामुपासते तत्पराः सन्तोऽनु-तिष्ठतीत्याभिप्रायः।ततस्तस्मिादन्धत्मकात्तमसो भूय इव बहुत्तरमेव ते तमः प्रविशन्ति, के ? कर्म हित्वा ये उ ये तु विद्यायामेव देवताज्ञान एवरता अभिरताः। तत्रावान्तरफलभदं विद्याकर्मणोः समुच्च्यकारण -माहः अन्यथा फलवद्फलवतोः समिन्हितयोरङ्गङ्गितैव स्याद् इत्यर्थः।।[1]

1.ईशावास्योपनिषद्, श्रीमच्छङ्करभगवत्पदाचार्य विरचितं

-उपनिषद् भाष्य, पृ. 9/10)

यदुक्तं भास्करेण सर्वाऽप्युपनिषेदकं प्राणाद्युपासनविधानस्यप्युप -निषत्सुदर्शनात् । सद्सत। न च तदपि ब्रह्मज्ञानाङ्गमिति वाच्यम्। पृथक्फलश्रवणात्। तेनामपि व्याकृताव्याव्याकृतोपासनसमुच्चयविधान- स्य प्रकरणभेदेनैवेष्टतवाद्वयाकृताव्य कृतोपा -सनस्य प्रकारान्तरत्वात -स्माद्यथा कर्मकाण्डेऽग्निहोत्रादिप्रकरणं भिन्नमेवेष्यते भिन्नाधिकारत्तत्कर्मणस्तम्भोप- निषत्स्वपि भिन्नाधिकारत्वात्कर्माविरुद्ध विद्याप्रकरणभेदो न विरुध्यते। मन्त्रार्थे ब्राह्मणसम्पत्तिं दर्शयितुमुपक्रमते।

तत्र वाक्ये कथमज्ञत्वामगम्यत् इत्याशङ्कयाऽऽह। ''जाया मे स्यादय प्रजामेयाथं वित्तं मे स्यादथ कर्मकुर्वीय'' ति कामयमानस्य सर्वथैव ब्राह्वो जायादियेदा न सम्पद्यते तदाऽध्यात्मं जायादिसम्पत्तिं दर्शयति मन इत्यादिना। एतच्चाज्ञत्वालिङ्गं मनआदिष्वात्मत्वाधिभि -मानस्याज्ञानकार्यतवात्। यथा च बाह्मकामिन्यलाभे सुप्तो मनोविजृम्भितकामिनीमुपसंसाराप्तिरेवेत्यपि तत्रैव दर्शितमित्याह। एकं साधारणमन्नं भोगसाधनानि मनोवाकप्राणलक्षणमिः पश्वर्थमेकं तत्पय इति सप्तान्नसर्गो दर्शितः श्रुत्वा यत्सप्तान्नामि मेधया तपसाऽजनयत्पितेत्यादिना। अत्रैकैको यजमान एव विहितप्रसिद्धज्ञान -कर्मानुष्ठानात्सर्वस्य संसारस्य साक्षातपारम्पराभ्यां जनकत्वात्पि -तोच्यने। तेषु च सृष्टेवन्नेषु तस्य पितुरहमिदं ममेदभित्यात्मत्वाध्या -सेन ममेदभित्यात्मत्वाध्यासेन मनआदिष्वितरेषु च सम्बन्धाध्यासेना- वस्थानं संसारः प्रसिद्ध इत्यर्थः।।[1]

1.श्रीसदानन्दगिर्याचार्य कृता भाष्यटीका, उपनिषद् भाष्य, पृ.9/10)

अन्यदेवाहुर्विद्ययान्यदाहुरविधेया।

इति शुश्रुम धीराणां ये नस्ताद्विचचाक्षिरे।।

1. ननु ज्ञानकर्मणोः पृथगनुष्ठानप्रसक्तिरेव नास्ति इति पृथगनुष्ठानं किमर्थं निन्द्यते अत आह- अन्यदेवेति। पृथक फलश्रवणात् पृथगनुष्ठयेत्वं प्रसक्तमेव-सायण अन्यत्पृथगे विधेया क्रियते फलमित्याहुर्वदन्ति ''विद्यया देवलोकः[1] विद्यया तदारोहन्ति'' इति श्रुतेः। अन्यादाहुरविधेया कर्मणा क्रियते ''कर्मणा पितृलोकः''[2] इति श्रुतेः। इत्येवं शुश्रुम श्रुतवन्तो वयं धीराणां धीमतां वचनम्। ये आचार्या नोऽस्मभ्यं तत्कर्म च ज्ञानं च विचचेक्षिरे व्याख्यातवन्तस्तेषामयमागमः पारम्पर्यागत इत्यर्थः।।[3] 10।।

एवं मन्त्रप्रदर्शिते निष्ठादृये ब्राह्मणसम्मतिं दर्शयित्वा प्रकरणविभागं दर्शयति। उत्तमाश्रित्य इत्यर्थः। साध्यसाधनभेदोपमर्देन यदात्मैकत्वाविज्ञानं यस्मिन्सर्वाणि भूतान्यात्मैवाभूदित्यवधारणेनोक्तं पूर्वार्धेन, उत्तरार्धेन च संसारनिवृत्तिफलमुक्तं तन्न श्रौतेन स्मार्तेन वा कर्मणा कैनचिदमूढ़ समुच्चिचीषति। अन्धं तम इत्यादौ तु समुच्चितचाषयाऽविद्वदादिनिन्दा दृश्यतक। ततः किमित्यत

---

1. बृ.उ. 1/5/16
2. बृ.उ. 1/5/16
3. ईशावास्योपनिषद्, श्रीमच्छङ्करभगवत्पदाचार्य विरचिते भाष्यम्, उपनिषद् भाष्य-पृ.-10)

आहकस्य तर्हि ज्ञानस्य कर्म समुच्चयः सम्भवतीत्यत्।[1]

(श्रीमदानन्दगिचार्यकृता भाष्यटीका, उपनिषद् भाष्य, पृ.10)

विद्या चाविद्यां च यस्तद्वेदोमय-ँसह।

अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।।[2]

यत एवमतो1 विद्यां चविद्यां व देवताज्ञानं कर्म चेत्यर्थः।

1. अत्र मतान्तरे-ज्ञानकर्मणोः समुच्चयोऽत्र विधीयते इत्यूचुः। तन्न। विद्या लत्र निर्गुणब्रह्मविधैवौक्ता अनेजदेकं स पर्यगाच्छुक्रमित्यादिना निर्गुण ब्रह्मबोधनात् निर्गणविद्यायाः कर्मसमुच्चयसम्भवात्। यत्तु उपासनरूप विद्या कर्माङ्गत्वेन विधीयते इत्युक्तम् तन्न उपासनायाः अङ्गत्वे पृथक् फलोक्तयनुपपत्तेः अङ्गेषु फलोक्तयनुपपन्तेः अङ्गेषु फलश्रुतेरर्थवादत्वात्, अतः उपासनाकर्मणो समुच्चयविधानमेवेदम्।

यस्तदेतदुभयं सर्हकेन पुरुषेण अनुष्ठेयं वेद तस्यैव समुच्चयकारिण एव एकपुरुषार्थसम्बन्धः क्रमेणस्यादित्युच्यते।

अविद्यया कर्मणा अग्निहोत्रादिना मृत्युंस्वाभाविकं कर्म ज्ञानं च मृत्युशब्दवाच्यमुभयं तीर्त्वाअतिक्रम्य विद्यया देवताज्ञानेनामृतं देवतात्मभावमश्नुते प्राप्नोति। तद्भयमुतमुच्यते यद्वेवतात्मगमनम्।।[3]

---

1. श्रीमदानन्दगिचार्यकृता भाष्यटीका, उपनिषद् भाष्य, पृ.10

2. ईशा. उ.मं.-11

3. ईशा. शंकराचार्य विरचित, उपनिषद् भाष्य-पृ.-11

नस्यामात्मकर्मा विरुद्धदेवताज्ञानस्यैवात्र समुच्चयो विधिस्यते। ननु देवताज्ञानस्य कर्मफलातिरिक्तफलाभावत्समुच्चयो न सम्भवतीत्यत ननु समुच्चिचीषया निन्देति किमति व्याख्यायते। अध्ययनविधेर्मोक्षादर्वाक्पर्यवसानानुपपत्तैर्दवलोकादिप्राप्तेः फलाभास--त्वात्प्रहाणार्थेव निन्दा किं नेष्यते। न फलशब्दो मोक्षे रूढ़ो मोक्षमनिच्छतामपि समीहिते फलव्यवहारदर्शनात्ततो यो देवलोकादिकमुपादित्सते तस्य तदपि फलं भवत्येवेत्यर्थः।।[1]

अग्ने नय सुपथाराये अस्मान्-

विश्वानि देव वयुनानि विद्वान्।

थुयोध्यस्मज्जुहुाणमनो भूयिष्ठां

ते नम उक्तिं विधेम्।।[2]

पुनरत्येन मनत्रेण मार्गं याचते। हे अग्ने। नय गमय सुपथा शोभनेन मागैण। सुपथेति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम्। निर्विण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेनातो याथे त्वां पुनः पुनर्गमनागमनवर्जितेन शोभनेन पथा नय। राये धनाय कर्मफल भोगयेतयर्थः अस्मान्यथोक्तधर्मफलविशिष्टानि सर्वाणि हे देव वयुनानि कर्मणि प्रज्ञानानि वा विद्वाज्जनान्।

1.श्रीमदानन्दगिर्याचार्य कृत भाष्यटीका, उपनिषद् भाष्य, पृ. 10-11

2. ईशा. 3.मं.-18

किञ्च युयोधि वियोजय विनाशाय अस्मदस्मतो जुहुराणं कुटिलं वञ्चनात्कमेनः पापम्। ततो वयं विशुद्धाः सन्त इष्टं प्राप्स्याम् इत्यभिप्रायः। किन्तु वयमिदानीं ते न शक्नुमः परिचर्या कर्तुम्। भूयिष्ठां बहुतरां ते तुभ्यं नम उक्तिं नमस्कार वचनं विधेम नमस्कारेण परिचरेण इत्यर्थः।

अविद्यया मृत्युं तीर्त्वा विद्ययाऽमुतमश्नुते।

''विनाशेन मृत्युं तीर्त्वाऽसम्भूत्याऽमृतमश्नुते'' इति श्रुत्वा केचित्संशयं कुर्वन्ति। अतस्तन्निराकरणार्थं संक्षेपतो विचारणां करिष्यामः। तत्र तावत्किंनिमित्तं संशय इत्युच्यते। विद्याशब्देन मुख्या परमात्मविधैव कस्मान्न गृहतेऽभृतत्वं च। नूनक्तायाः परमात्मवि?ायाः कर्मणश्च विरोधात्समुच्चयनुपपत्तिः। सत्यम्। विरोधस्तु नावगम्यते, विरोधाविरोधयोः शास्त्रप्रमाणकत्वात्। यथाऽविद्यानुष्ठानं विद्योपासनं च शास्त्रप्रमाणकत्वात्। यथाऽविद्यां मनुष्ठानं विद्योपासनं च शास्त्रप्रमाणकं तथा तद्वितरोधविरोधावपि।

यथा च न हिंसात्सर्वा भूतानीति शास्त्रादवगतं पुनः शास्त्रेणैव बाह्यते–अहवरे पशुं हिंस्यादिति। एवं विद्यायेारपि स्यात्, विद्याकर्मणोश्च समुच्चयः।

न ''इत्येते विपरीते विषूची अविद्या या च विद्यै''

इतिश्रुतेः हेतुस्वरूपफलविरोधात्। विद्यां चाविद्यां चेति वचनात् विरोध इति चेन्न। विद्योऽविद्ये इति चेन्न। विद्योत्पत्तावसम्भवात्। समुच्चयविधानविरोध एवेति चेन्न। सहसम्भावानुपपत्तेः क्रमेणैकाश्रये स्यातां विद्यानुपपतेः। न ह्याग्निःरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिनाश्रये

तदत्पन्नं तस्मिन्नेवाश्रये शीतोऽग्निरप्रकाशो वेत्यविद्याया उत्पत्तिर्नापि संशयोऽज्ञानं वा। यस्मिनसर्वाणि भूतान्यात्मैवाभूदविजानतः। तत्र को मोहः कः शोकः एकत्वमनुपश्यत'' इति शोकमोहाद्यपपातिमवोचामं। अमुतमश्नुते इत्यापेक्षिकममृतं विद्याशब्देन परमात्मविद्याग्रहणे हिरण्येनेत्यादिना द्वादंशमार्गादियाचनामनुपपन्नंस्यातस्मादुपासनया समूच्यो न परमात्मविज्ञानेनेति यथास्माभिव्यरिख्यात एव मन्त्रार्थ इत्युपरभ्यते।।[1]

न हिंस्यादित्येकं शास्त्रं अग्निषोमीयं पशुं हिंस्यादित्यपरं तयोः विरोधो दृश्यते। अतः राग प्राप्त हिंसा विषयत्वेन अहिंसाशास्त्रं सङ्गोच्यते, पकृते तु समुच्चयः शास्त्रेणैव प्रतिपाद्यते तत्र को विरोधः इति पूर्वपक्षः। निर्गुणविद्यायाः कर्मणा समुच्चयासम्भवादेवात् सगुणोपासनरूपा विद्या गृहीता। क्रमिकसमुच्चयस्तु सम्भवत्येवेदोषः।

अमृत्वं च मुख्यमेव कस्मान्नगृहत इति सम्बन्धः। शास्त्रीययेर्ज्ञान -कर्मणोविरोधाविरोधौ शास्त्रीययामेव ग्राह्यो न तर्कमात्रेणेति परेणोक्ते सिद्धान्ती शास्त्रसिद्ध एव विरोध इत्याह। विषूची नानागतौ विद्याविद्ये इदं विपरीते अतिशयेन विरुद्धे इत्यर्थः।

---

1. ईशावास्योपनिषद्, श्रीमच्छङ्करभगवत्पदाचार्य विरचिते भाष्यम्, उपनिषद् भाष्य-पृ.-14-15

काऽनुपत्तिः ? काठके विरोधश्रवणात् तद्गतविद्याविद्ययोविरोधोऽस्तु। इह त्वविरोधश्रवणादविरोधो भविष्यतीति न वाच्यम्। विरोधाविरोधयोः सिद्धत्वेन विकल्पासम्भवत्। उदितानुदितहोमयोर्हि पुरुषतन्त्रत्वाद्युष्टो विकल्प इत्युक्तं, तर्हिविरोध एवास्तु समुच्चयविधिबलादिति चेन्न। मुख्यब्रह्मविधिरसिद्ध। सिद्धे समुच्चयविधौ तद्बलादविरोधवगामाच्च समुच्चयसिद्धिरत्न्योन्याश्रयः रत्यादित्यर्थः। सहस्रसम्भवानुपपत्तावपि क्रमेणैकाश्रये विद्याविद्ये स्यातमिति चेद्यादि पूर्वमविद्यो पश्चातु विद्येति क्रमहर्ष्तीष्यति एव। पूर्व सिद्धया अविद्याः प्रहवस्तवादन्यस्यारित्यर्थः। विद्यात्पततौ मा भूदिविद्यो कर्म तु भविष्यति विदुषोऽपि व्याखयानभिक्षाटनादि –दर्शनादित्याशङ्कयाह। श्चोदनाप्रयुक्तानुष्ठानं हि कर्म ज्ञानेन सहत्व कामभात्मकामिनो हि सर्वाश्चिोदनाः।

अकामिनः क्रिया कश्चिद्दृश्यते नेह विद्वच्छशरीरस्थि –सिहेत्वाविद्यालेशाश्रयकर्मशेष –निमित्तं तु विदुषो भिक्षाटनादि न कर्म चोदनाभावात्किन्तु यावत्प्राणशरीसंयोगभावि तत्कर्माभासं तत्वविद्वानं स्वगतं मन्यते। कर्माध्यासोपानादिविद्याया असम्भवावान्नैव किञ्चत्करोमीति प्रत्ययाच्चेति भावः। यदुक्तममृतशब्देन मुख्यमेवामृतत्वं किं न मन्त्रेण द्वारमार्गयाचनमनुपपन्नं स्यात्। न तस्य प्राणा उत्कामन्त्र्यत्र ब्रह्म समनुशते इत्यादिश्रुतेः। ततो मुख्यार्थबाधादगीणार्थ ग्रहणं युक्तमित्यर्थः। यस्मादर्थान्तरं न सङ्गच्छते तस्मादत्युपसंहारः।।[1]

---

1. ईशा. आनन्दगिरी टीका, उपनिषद् भाष्य, पृ.–15)

द्वितीयो विरामः

कर्मविषयकमन्त्राणां समीक्षणम्

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः।

एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥

एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनाऽऽत्मज्ञाननिष्ठतया रक्षितव्य इत्येष वेदार्थः। अथितरस्यानात्मतयाऽऽत्मग्रहणायाशक्तस्येदमुपदिशति मन्त्रः।

१- कुर्वन्नेवेह इह निर्वर्तयन्नेव कर्माण्यग्निहोत्रादीनि जिजीविषेज्जीवितु -मिच्छेच्छतं शत संख्याकाः समाः संवत्सरान्। तावद्धि पुरुषस्य परमायुर्निरुपतिम्। तथा च प्राप्तानुवादेन यज्जिजीविषेच्छतं वर्षाणि तत् कुर्वन्नेव कर्माणीत्येतद्विधीयते।

१- अत्र कुर्वन्नेव जिजीविषेदिति न विधिः जीवनेच्छायाः राग प्राप्तवत् अपि तु यदि जिजीविषेत् तदा कर्वन्नेव जिजीविषेदिति इच्छामनूद्य कर्मकरणं विधीयते। पूर्वमन्त्रस्य तु मा च गृधस्य इति इच्छानिषेधात् संन्यासि विषयत्वम्।अस्य तु इच्छानुवादात् गृहस्थविषयत्वं न स्पष्टमेव। ततो मन्त्रयोर्भिन्न विषयत्वात् ब्रह्मविद् एव कमैविधिरिति न युक्तम्। स्तुतयेभनुमतिर्वा ब्रह्मसूत्रे तु यद्यप्यत्र प्रकरण सामर्थ्यात्

विद्वानेव कुर्वन्नित्यभिसम्बध्यते तथापि विद्यास्तुतये कर्मनुज्ञानमेतदित्युक्तम् तवता न ज्ञानकर्मसमुच्चयःसिद्धयेत् ॥

एवमेवम्प्रकारेण त्वयि जिजीविषति नरे नरमात्राभिमानिनीत एतस्मादग्निहोत्रादीनि कर्माषि कुर्वतो वर्तमानात्प्रकरादन्यथा प्रकारान्तरं नास्ति येन प्रकारेणाशुभं कर्म न लिप्यते कर्मणा न लिप्यत इत्यर्थः । अतः शास्त्रविहितानि कर्माण्यग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत् ।

कथं पुनरिदकवगम्यते पूर्वेण मंत्रेण संन्यासिनो ज्ञाननिष्ठोक्ता द्वितीयेन तदशक्तस्य कर्मनिष्ठेति ।

उच्यते ज्ञानकर्मणोर्विरोधं पर्वतवदकम्प्य। यथोक्तं न स्मरसि किम्। इहाप्युक्तं ''यो हि जिजीविषेत् स कमर कुर्वन्।'' ''ईशावास्यमिदं सर्वम''। तेन त्यक्तेन भुञ्जीथाः। मा गृधः कस्यस्विद्धनम्। इति च ।न जीवते मरणे वा गृधि। कुर्वीतारण्यमियादिति च पदम्। ततो न पुनरित्यात् इति संन्यासशासनात्। उभयोः फलभेदं च वक्ष्यति ।

इमौ द्वावेव पन्थानवनुनिष्क्रान्ततरौ भवतः क्रियापथश्चैव पुरस्तात्संन्यासश्चोत्तरेण। निवृत्तिमार्गेण एषणात्रयस्य त्यागः। तयोः संन्यासपथ एवातिरेचयति। न्यास एवात्यरेचयत्। इति च तैत्तिरीयके ।

द्वाविमावथ पन्थानौ यत्र वेदाः सुप्रतिष्ठताः ।

प्रवृत्तिलक्षणो धर्मो निवृतश्च विभावितः ॥[१]

इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासथन वेदाचार्येण भगवता। विभागश्चानयोः दर्शयिष्यामः ॥

पूर्वमन्त्रेण ज्ञानं विहितं यस्य तस्यैवोत्तरमन्त्रेण कर्म विहितं ततः समुच्चयानुष्ठाने तात्पर्यं मन्त्रद्वयस्येत्येकदेशिशङ्कामुद् भावयति। शुद्धब्रह्मज्ञानकर्मणी नैकाधिकारे विरुद्धत्वादृतुगमन त्रिदण्डिऽधर्मवत्। अस्त्येव तत्रापि क्रमेणैक कतृकत्वमिति चेन्न। विशिष्टरूपभेदाद भिन्नाधिकारत्वात्।

ऋतुगमनत्रिदण्डिधर्मयोरप्यविरोध प्रसङ्गात्ष तदुभयं नैकस्य विहितमिति चेत्तुल्यमेतत्। प्रतिषेधाचत न समुच्चय इति चेदिहापि न कर्मणा न प्रजया ।[२]

नानु ध्यायाद् बहुञ्छब्दानि त्यादिञ्प्रतिषेधस्तुल्यः। केवल कमरविषयो निषेध इति न च वाच्यं केवलपदव्यवच्छेद्याभावात्समुच्चय विधिरद्याप्यनिश्चितत्वात्तस्मान्न समुच्चये तात्पर्यं मन्त्रद्वयस्येत्याह । कतृत्वाद्यध्यासाश्रय। कर्म शुद्धत्वाकतृत्वादि ज्ञानेनोपमृद्यत इति।सम्बन्धग्रन्थे

१ः महा. शा. २४१ ॥६ ॥

२ः विशिष्टरूपभेदः गृहस्थत्वसंन्यासित्व विशिष्टयोर्भेदः

यथोक्तं सहानवस्थानलक्षणं विराधं किं न स्मरसि येनैकाधिकारत्वं तयोः कल्पयसीत्यर्थः।मन्त्रलिङ्गादपि तयोर्भिन्नाधिकारत्वं तयोः कल्पयसीत्यर्थः। मन्त्रलिङ्गादपि तयोर्भिन्नाधिकारत्वं प्रतीयत इत्याह। जिजीविषो रागिणः कर्म विहितं सर्वमीश्वर एवेति ज्ञानवतस्तागो विहितः । किञ्च धनसमपन्नस्यैव कर्मण्यधिकारः प्रथममन्त्रार्थाधिकारिणश्च धनकाङ्क्षानिषेधेन प्रतीयत इत्यर्थः।

जिजीविषा हि कर्माधिकारिण एव न ज्ञानाधिकारिण इत्यत्र प्रमाणमाह। अरण्यं स्त्रीजनासङ्कीणरमाश्रममियाद् गच्छेदिति पद। वेदशास्त्रस्थितिस्ततो ऽरण्यवासो पलक्षितातसंन्यासन्न पुनरियात् कर्मश्रद्धया न प्रत्यावृतिं कुर्यादिति जिजीविषादिरहितस्य संन्यासविधानादितयर्थः। इतश्च नैकफलकामस्य ज्ञानकर्मणोरधिकारः प्रतिपत्तव्य इत्याह। को मोहः कः शोक एकत्वमनुपश्यत इति सनिदानानर्थ प्रहाणं ज्ञानफलं वक्ष्यति।

संसारमण्डलान्तर्गतमेव च देशान्तरप्रत्यायत्तं हिरण्यगर्भपद प्राप्त्यादिलक्षणं कर्मफलं वक्ष्यति। अग्ने नय सुपथेत्येन्ते नेत्यर्थः। नारायणोपनिषद् वाक्यमपि भिन्नाधिकारित्वे प्रमाणयति। पुरस्तात्सृष्टिकालंऽनुनिष्क्रन्ततरौ भूतसृष्टिमनुप्रवृत्तौ भिन्नाधिकारित्वादुभयोः संन्यास एवातिरिक्तः श्रेष्ठो भवति परमपुरुषार्थाव्यवधानादित्यर्थः । व्यासवाक्यमपि सम्बादकमाह ॥२॥

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्ववत्।

तद्धावतोऽन्यानत्येति तिष्ठ तस्मिन्नपो मातरिश्वा दधाति॥

यस्यात्मनो हननादविद्वांसो संसरन्ति तद्विपर्ययेण विद्वासों जना मुच्यन्ते ते नात्महनः तत् कीदृशमात्मतत्त्वमित्युच्यन्ते।

अनेजत् न एजत्। एजृ - कम्पने कम्पनं चलनं स्वावस्थाप्रच्युतिस्तद्वर्जितं सर्वदैकरूपमित्यर्थः। तच्चैकं सर्वभूतेषु मनसः सङ्कल्पादिलक्षणाद् जवीयो जववत्तरम्।

कथं विरुद्धमुच्यते। ध्रुवं निश्चलमिदं मनसो जवीय इति च । नैष दोषः। निरुपाध्युपाधिमत्वेनोपपन्तेः । तत्र निरुपाधिकेन स्वेन रूपेणोच्यते अनेकदेकमिति मनसोऽन्तः करणस्य सङ्कल्पविकल्पलक्षणस्योपधिरनुवर्त्तनाद् इह देहस्थस्य मनसो ब्रह्मलोकादिदूरगनं सङ्कल्पेन क्षणमात्राद्भवतीत्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम्।

तस्मिन् मनसि ब्रह्मलोकादीन्द्रुतं गच्छति सति प्रथमं प्राप्त इवात्मचैतन्यावभासो गृह्यतेऽतो मनसो जवीय इत्याह।

नैनद्देवा द्योतनाद्देवश्चक्षुरादीनीन्द्रियाण्येतत्प्रकृतमात्मतत्वं नाप्नुवन्न प्राप्तवन्तः ।तेभ्यो मनो जवीयः। मनोव्यापारव्यवहितत्वाद् आभासमात्रमपि आत्मनो नैव देवानां विषयभिवति।

यस्माज्जवनान्मनसोऽपि पूर्वमर्षत् पूर्वमेव गतं व्योमवतद्व्यापित्वात् सर्वव्यापि तदात्मततवं सर्वसंसारधमरवर्जितं स्वेन निरुपाधिकेन स्वरुपेणाविक्रियमेव सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीत्यविवेकिनां मूढानामनेकमिव व प्रतिदेहं प्रत्यवभासत इत्येतदाह ।

तद् धावतो द्रुतं गच्छतोभन्यानात्मविलक्षणान्मनोवागिन्द्रियप्रभतीनत्येति अतीत्य गच्छति इव । इवार्थं स्वयमेव दर्शयति तिष्ठदिति स्वयमविक्रियमेव सदित्यर्थः ।

तस्मिन्नात्म तत्वे सति नित्यचैतन्यस्वभावे मातरिश्वा मातरि अन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः सर्वप्राणभृत् क्रियात्मको यदाश्रयाणि कार्यकरणजातानि यस्मिन्नोतानि प्रोतानि च यत्सूत्रसंज्ञकं सर्वस्य जगतो विधातयितृ स मातरिश्वा अपः कर्माणि प्राणिनां चेष्टालक्षणानि अग्न्यादित्यपर्जन्यादीनां ज्वलनदहनप्रकाशाभि वर्षलक्षणानि दधाति विभजति इत्यर्थः ।

धारयति वा[1] भीषास्माद् वातः पवते । इत्यादि श्रुतिभ्यः ।

1.तै ॥ उ ॥२ ॥८ ॥१ ।

सर्वा हि कार्यकरणादि विक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थः ॥[१]

अविक्रियमेकं चेदात्मतत्वं कथं तर्हि केचन स्वर्गगामिनः केचन नरकगामिन इति संसारिकव्यवस्था स्तादिति चेन्मन उपाधि निबनधनेत्यभिप्रैत्याह। उपाधेरनुवर्तनात् विक्रियादि व्यवहारश्रयत्वमिति शेषः।[२] ननु मनसो देहान्तः स्थत्वाद् बहिर्गमनायोग्यत्वात्कथं वेगवत्वमित्या शङ्कयाह। जवीयस्त्वादेश्वादिवत्तर्हि चक्षुरादिग्राह्यत्वं प्राप्तमित्याशङ्कयाऽह। चक्षुरादिप्रवृत्तेर्मनोव्यापार पूर्वकत्वात्तदविषयत्वे चक्षुरादिविषयत्व मप्यात्मनो न सम्भवतीत्यर्थः।मनसो वा कथं न विषय आत्मेत्यत आह। यथा मनः स्थं परिमाणं मनसो न विषयोऽत्यन्ताव्यवधानात्तथाऽत्माऽप्यन्ता व्यवधानान्नसो न विषयस्तद् व्यापकत्वाच्चेत्यर्थः।उक्तात्मसम्भावनायोपपत्तिमाह। श्रोतानि कर्माणि सोमाज्यपयः प्रभृतिभिरद्भिः सम्पाद्यन्त इति सम्बधाल्लाक्षणिकोप्शब्दः कर्मसु प्राणचेष्टाताशचाविनमित्तत्व प्रसिद्धेः कारणवाचकः शब्दः कार्ये लक्षणया प्रयुक्त इत्यर्थः। ईश्वरस्यापि

---

१ ईशावास्योपनिषद

२॥ उ ॥भा ॥पृ ६ ।७ ॥

हिरण्यगर्भस्य नियतप्रवृत्यन्यथानुपपत्याधिष्ठाता परमेश्वरः सम्भाव्यत इत्युक्तमिदानिं मातरिश्वाग्रहनमुपलक्षणार्थमादाय तात्पर्यमाह ॥[१]

अन्धं तमःप्रविशन्ति येऽविद्यामुपासते ।

ततो भूय इव ते तमो य उ विद्याया गुँरताः ॥[२]

अत्राऽद्येन मन्त्रेण सर्वैषणापरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः ।

ईशा वास्यमिदं सर्वं मा गृधः कस्यस्विद्धनम् इति ।

अज्ञानां जिजीविषूणां ज्ञाननिष्ठासम्भवे ' कुर्वन्नेवेह कर्माणि जिजीविषेत् ' इति कर्मनिष्ठाक्तो द्वितीयो वेदार्थः ।अनयोश्च निष्ठयोविभागो मन्त्रप्रदर्शितयो बृहदारण्यकेभ पि ' सोऽकामयत जाया मे स्यात् ' इत्यादिना अज्ञस्य कामिनः कर्माणीति। मन एवास्यात्ना वाग्जाया इत्यादिवचनातद् अज्ञत्वं कामित्वं व कर्मनिष्ठस्य निश्चितमवगम्यते ।

तथा व तत्फलं सप्तान्नसर्गस्तेषात्मभावेनात्म स्वरूपावस्थानम्। जयाद्येषणात्रयसंन्यासेन च आत्मविदां कर्म निष्ठाप्रातिकूल्येनात्मस्वरूपनिष्ठैव दर्शिता ' किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः ' इत्यादिना ।

---

१ – उ ।भा । ॥ ४

२ –ईशावास्योपनिषद् ॥९॥

ये तु ज्ञाननिष्ठाः संन्यासिनस्तेभ्योऽसुर्या नाम त इत्यादिना । अविद्वन्निदाद्वारेण आत्मनो याथात्म्यं स पर्यगाद् इत्येतदन्तैर्मन्त्रैरूपदिष्टम्॥ ते ह्यत्राधिकृता न कामिन इति। तो च श्वेताश्वतराणां मन्त्रोपनिषदि 'अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच समयगृषिसङ्घजुष्टम्' इत्यादि विभज्योक्तम्। ये तु कर्मणिः कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवस्तेभ्य इदमुच्यते।

कथं पुनतेवगम्यते न तु सर्वेषाम् इति। उच्यते अकामिनः साध्यसाधनभ ेदोपमर्देन 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः।

तत्र को मोहः कः शोक एकत्वमनुपश्यतः । इति यदात्मैकत्वविज्ञानम् तन्न केनचित्कर्मणा ज्ञानान्तरेण वा ह्यमूढः समुच्चिचषिति। इह तु समुच्चिचीषया अविद् वदादिनिन्दा क्रियते ।तत्र च यस्य येन समुच्चयः सम्भवति न्यायतः शास्त्रतो वा तदिहोच्यते यद्वैवं वित्तं देवताविषयं ज्ञान कर्म सम्बन्धित्वेनोपन्यस्तं न परमात्मज्ञानम् । विद्यया देवलोकः इति पृथक्फलश्रवणात्। तयोर्ज्ञानकर्मणोरिह एकैकानुष्ठाननिन्दा समुच्चिचीषया न निन्दापरैव एकैकस्य पृथक्फलश्रवणात् विद्यया तदारोहन्ति 'विद्यया देवलोकः' ' न तत्र दक्षिणा यन्ति' कर्मणा पितृलोकः' इति । न हि शास्त्रविहितं किञ्चिदकर्तव्यतामियात।

तत्र अन्धन्तमोऽदर्शनात्मकं तमः प्रविशन्ति । के । येऽविद्यां विद्याया अनया अविद्या तां कर्म इत्यर्थः कर्मणो विद्याविरोधत्वात् । तामविद्यामग्निहोत्रादिषक्षणामेव केवलामुसते तत्परा सन्तो ऽनुतिष्ठन्तीत्यभिप्रायः।तत्तस्तस्मादन्धात्मकात्तमसो भूय इव बहुतरमेव ते तमः प्रविशन्ति ॥के। कर्म हित्वा ये उ ये तु विद्यायामेव देवताज्ञान एव रता अभिरताः । तत्रावान्तरफलभेदं विद्याकमरणोः समुच्चयकारणमाह॥ अन्यथा फलवद फलवतोः सन्निहितयोरङ्गाङ्गि तैव स्याद् इत्यर्थः ॥[१]

यदुक्तं भास्करेण सर्वाऽप्युपनिदेकं ब्रह्मविद्या प्रकरणं ततः प्रकरण

भेदकरणमनुचितमिति। तदसत्। प्राणद्युपासनाविधानस्याप्युपनिषत्सु दर्शनात्। न च तदपि ब्रह्मज्ञानाङ्गमिति वाच्यम्। पृथक्फल श्रवणत्। तेनापि व्याकृताव्याकृतोपासनसमुच्चय विधानस्यप्रकरणभेदेनैष्टत्वाद्वया कृताव्याकृतो -पासनस्य प्रकारान्तरतवात्तस्माद्यथा कर्मकाण्डेऽग्निहोत्रादि प्रकरणं

भिन्नमेवेष्यते भिन्नाधिकारात्वात्तत्तत्कर्मणस्तभोपनिषत्स्वपि भि न्नाधिकारत्वात्कर्मा -विरुद्धतद्विरुद्धविद्याप्रकरणभेदो न विरुध्यते। मन्त्रार्थे ब्राह्मणसम्मतिं दर्शयितुमुपक्रमते।

१-ईशावास्योपनिषद् ॥९॥

तत्र वाक्ये कथमज्ञत्वमवगमयत इत्याशङ्क्याऽऽह । जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीये ति। कामयमानस्य सर्वथैव बाह्यो जायादिर्यदा न सम्पद्यते तदाऽध्यात्मं जायादिसम्पत्तिं दर्शयतिमन इत्यादिना।

एतच्चाज्ञत्वलिङ्गं मन आदिष्वात्मत्वाद्यभिमानस्याज्ञानकार्यत्वात्।यथा च बाह्यकामिन्यलाभे सुप्तो मनोविजृम्भितकामिनीमुपभुञ्जानोऽज्ञः प्रसिध्दस्त -द्वदयमपीत्यर्थः। तेषां च कर्मणां फलं संसाराप्तिरेवेत्यपि तत्रैव दर्शतमित्याह।एक। साधारणन्नं यदिदमद्यते द्वे देवानां हुतप्रहुते दर्शपूर्णमासौ वा त्रीण्यस्य भोगसाधनानि मनोवाक्प्राणलक्षणानि पश्वर्थमेकं तत्पय इति सप्तान्नसर्गो दर्शतिः श्रुत्या यतसप्तन्नानि मेधया तपसाऽजनयत्पितेत्यादिना ।अत्रैकैको यजमान एव विहितप्रतिषिद्धज्ञान कर्मानुष्ठानात्सर्वस्य संसारस्य साक्षात्पारम्पर्याभ्यां जनकत्वात्पितोच्यते। तेषु व सृष्टेष्वन्नेषु तस्य पितुरहमिदं ममेदमित्यात्मत्वाध्यासेन मन आदिष्वियतेषु च सम्बन्धाध्यासेनावस्थानं संसारः प्रसिद्ध इत्यर्थः॥[१]

अन्यदेवाहुर्विद्ययान्यदाहुर विद्यया।

इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे॥

१-उ.भा.पृ ।९।१०॥

अन्यत्पृथगेव विद्यया क्रियते फलमित्याहुर्वदन्ति। विद्यया देवलोकः विद्यया तदारोहन्ति।[१] इति श्रुतेः।

अन्यदाहुरविद्यया कर्मणा क्रियते। कर्मणा पितृलोकः। इति श्रुतेः । इत्येवं शुश्रुम श्रुतवन्तो वयं धीराणां धीमतां वचनम्। ये आचार्या नोऽस्मभ्यं तत्कर्म च ज्ञानं च विचचक्षिरे व्याख्यातवन्तस्तेषामयमागमः पारम्पर्यागत इत्यर्थः॥[२]

एवं मन्त्रप्रदर्शिते निष्ठाद्वये ब्राह्मणसम्मितं दशरयित्वा प्रकरण विभागं दर्शयति।उत्तमाश्रमिभ्य इत्यर्थः। साध्यसाधनभेदोपमर्देन यदात्मैकत्वविज्ञानं यस्मिन्सर्वाणिभीतान्यात्मैवाभूदित्यवधारेणेनोक्तं पूर्वार्धेन उत्तरार्धेन च संसारनिवृत्तिफलमुक्तं तन्न श्रौतेन स्मार्तेन वा कर्मणा केनचिदमूढः समुच्चिचीषति।अन्धं तम इत्यादौ तु समुच्चिचीषयाऽ विद्वदादिनिन्दा दृश्यते। ततः किमित्यत आह कस्य तर्हि ज्ञानस्य कर्म समुच्चयः सम्भवतीत्यत।

---

१ बृ .उ ।१।५।१६॥

२- बृ .उ ।१।५।१६॥

विद्यां चाविद्यां च यस्तद्वेदोभय ँ सह।

अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥[१]

यत एवमतो ३- विद्यां चाविद्यां च देवताज्ञानं कर्म चेत्यर्थः॥ यः तदे तदुभुयं सहैकेन अत्र मतान्तरे - ज्ञानकर्मणोः समुच्चयोऽत्र विधीयत इत्यूचुः। तन्न । विद्या ह्यत्र निर्गुणब्रह्मविद्यैवोक्ता अनेजदेकं स पर्यगाच्छुक्रमित्यादिना । निर्गुणबोधनात् निर्गुणविद्ययाः कर्मसमुच्चयासम्भवात्। यत्तु उपासनरूपविद्या

३ - अत्र मतान्तरे - ज्ञानकर्मणोः समुच्चयोऽत्र विधीयत इत्यूचुः। तन्न । विद्या ह्यत्र निर्गुणब्रह्मविद्यैवोक्ता अनेजदेकं स पर्यगाच्छुक्रमित्यादिना ।

निर्गुणबोधनात् निर्गुणविद्ययाः कर्मसमुच्चयासम्भवात्। यत्तु उपासनरूप -विद्या कर्माङ्गत्वेन विधीयत इत्युक्तम्।तन्न उपासनायाः अङ्गत्वेन पृथक् फलोक्तयनुपपत्तेः अङ्गेषु फलश्रुतेरर्थवादत्वात् अतः उपासनाकर्मणोः समुच्चयविधानमेवेदम्॥ पुरूषेण अनुष्ठेयं वेद तस्यैवं समुच्चयकारिण एव एकपुरुषार्थसम्बन्धः क्रमेण स्यादित्युच्यते।

---

१ - ईशा. उ ॥११॥

अविद्यया कर्मणा अग्निहोत्रादिना मृत्युं स्वाभाविकं कर्म ज्ञानं च मृत्युशब्दवाच्यमुभयं तीर्त्वा अतिक्रमय विद्यया देवताज्ञानेनामृतं देवतात्मभावमश्नुते प्राप्नोति। तद् भयमृतमुच्यते यद्देवतात्मगमनम् ॥११ ॥

तस्मात्कर्मा विरुद्धदेवता ज्ञानस्यैवात्र समुच्चयो विधित्सयते। ननु देवताज्ञानस्य कर्मफलातिरिक्तफलाभावात्समुच्चयो न सम्भवतीत्यत । ननु समुच्चिचीषया निन्देति किमिति व्याख्यायते। अध्ययनविधेर्मोक्षाद-र्वाक्पर्यवसानानुपपत्तैर्देवलोकादिप्राप्तेः फलाभास त्वात्प्रहाणार्थैव निन्दा किं नेष्यते न फलशब्दो मोक्षे रुढो मोक्षमनिच्छतामपि समीहते फलव्यावहारदर्शनात्ततो यो देवलोकादिकमुपादित्सते तस्य तदपि फलं भवेत्येवेत्यर्थः ॥११ ॥

अग्ने नय सुपथा राते अस्मान् विश्वानि देव वयुनानि विद्वान्।

युयोध्यस्म ज्जुहुराणमनो भूयिष्ठां ते नम उक्तिं विधेम् ॥[१]

पुनरन्येन मन्त्रेण मार्गं याचते । हे अग्ने । नय गमय सुपथा शोभेनेन मार्गेण । सुपथेति विशेषणं दक्षिणामार्गनिवृत्यर्थम् ॥ निर्विण्णोऽहं

१-इशा ़उ ।१८ ॥

दक्षिणेन मार्गेण गतागतलक्षणेनातो याचे त्वां पुनः पुर्नगमनागमनवर्जितेन शोभनेन पथा नय। राये धनाय कर्मफलभोगयेत्यर्थः अस्मान्यथोक्तफलविशिष्टान् विश्वानि सर्वाणि हे देव वयुनानि कर्माणि प्रज्ञानानि वा विद्वाञ्जानन्।

किञ्च युयोधि वियोजय विनाशय असमदस्मत्तो जुहुराणं कुटिलं वञ्चनात्मकेनः पापम्। ततो वय। विशुद्धाः सन्त इष्टं प्राप्स्यामो इत्यभिप्रायः।किन्तु वयमिदानीं ते न शक्नुमः परिचर्यां कर्तुम्। भूयिष्ठां बहुतरां ते तुभ्यं नम उक्तिं नमस्कारवचनं विधेम नमस्कारेण परिचरेम इत्यर्थः।

अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।

विनाशेन मृत्युं तीर्त्वाऽसम्भूत्याऽमृतमश्नुते।

इति श्रुत्वा केचित्संशयं कुर्वन्ति। अतस्तन्निराकरणार्थं संक्षेपतो विचारणां करिष्यामः। तत्र तावत्किंनिमित्तः संशय इत्युच्यते । विद्याशब्देन मुख्या परमात्म विधैव कस्मान्न गृह्यतेऽमृत्वं च । ननुक्तायाः परमात्मविद्यायाः कर्मणश्च विराधात्समुच्चयानुपपत्तिः। सत्यम्। विरोधस्तु नावगम्यते विरोधाविराधयोः शास्त्रप्रमाणकत्वात्। यथाऽविद्यानुष्ठानं विद्योपासनं च शास्त्रप्रमाणकं तथा तद्विरोधावपि।

यथा च १- न हिंसात्सर्वा भूतानीति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यते । अधवरे पशुहिंस्यादिरि। एवं विद्याविद्ययोरपि स्यात्। विद्याकर्मणोश्च समुच्चयः॥

न दूतमेते विपरीते विषूचि अविद्या या च विद्येति श्रुतेः। हेतुस्वरूपफलविरोधात्। विद्यां चाविद्यां चेति वचनादविरोध इति चेन्न। विद्याऽविद्या विरोधाविरोधयोर्विकल्पासम्भवात्। समुच्चयविधानादविरोध एवेति चेन्न । सहसम्भ वानुपपत्तेः। क्रमेणैकाश्रये स्यातां विद्याविद्ये इति चेन्न। विद्योत्पत्तावविद्यायाह्यस्तत्वात्तदाश्रयेऽविद्यानुपपत्तेः। न ह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यसिमन्नाश्रये तदुत्पन्नं तस्मिन्नेवाऽऽश्रये शीतोऽग्निरप्रकाशो वेत्यविद्याया उत्पत्तिर्नापि संशयोऽज्ञानं वा ।

१ - न हिंस्यादित्येकं शास्त्रं अग्निषोमीयं पशु हिंस्यादित्यपरं तयोः विरोधो दृश्यते। अतः राग प्राप्तहिंसा विषयतवेन अहिंसाशास्त्रं सङ्केच्यते प्रकृते तु समुच्चयः शास्त्रेणैव प्रतिपाद्यते तत्र को विराध इति पूर्वपक्षः। निर्गुणविद्यायाः कर्मणा समुच्चयासम्भवादेवात्र सगुणोपासनरूपा विद्या गृहिता। क्रमिकसमुच्चयस्तु सम्भवत्येवेत्यदोषः॥

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यत । इति शोकमोहाद्यसम्भवश्रुतेः। अविद्याऽसम्भवात्तदुपादानस्य कर्मणोऽप्यनुपपत्तिमवो- चामः॥ अमृतमश्नुते इत्यापेक्षिकममृतं। विद्याशब्देन

परमात्मविद्याग्रह्मणे हिरण्मयेनेत्यादिना द्वारमार्गादियाचनमनुपपन्नं स्यात्तस्मादुपासनया समुच्चयो न परमात्मविज्ञानेनेति यथास्माभिर्व्याख्यात एव मन्त्रार्थ इत्युपरम्यते। [१]

अमृतत्वं च मुख्यमेव कस्मान्न गृह्यत इति सम्बनधः। शास्त्रीययोर्ज्ञानकर्मणोर्विरोधाविरोधौ शास्त्रीयावेव ग्राह्यो न तर्कमात्रेणेति परेणोक्त सिद्धान्ती शास्त्रसिद्ध एव विरोध इत्याह। विषूचि नानागतौ विद्याविद्ये दूरं विपरति अतिशयेन विरुद्धे इत्यर्थः। काऽनुपपत्तिः।

काठके विरोध श्रवणात् तद् गतविद्याविद्ययोर्विरोधोऽस्तु। इह त्व विरोधश्रवणादविरोधो भविष्यतीति न वाच्यम्। विरोधाविरोधयोः सिद्धत्वेन विकल्पासम्भवात्। उदितानुदितहोमयोर्हि पुरुषतन्त्रत्वाद्युक्तो विकल्प इत्युक्तं तर्ह्यविरोध एवास्तु समुच्चयविधि बलादिति चेन्न। मुख्यब्रह्मविद्याविद्ययोः शुक्तिविद्याविद्ययोरिव सहसम्भ वानुपपत्तेः समुच्चयविधिरसिद्धः। सिद्धे समुच्चयविधौ तद् बलादविरोधावगमाच्च समुच्चयसिद्धि रित्यन्योन्याश्रयः स्यादित्यर्थः।सहसम्भवनुपपत्तावपि क्रमेणैकाश्रये विद्याविद्ये स्यातामिति चेद्यदि पूर्वमविद्या पश्चात्तु विद्येति क्रमस्तर्हीष्यत एव।

---

१ – ईशावास्योपनिषत् ॥१८॥

पूर्व सिद्धाया अविद्यायाः प्रध्वस्तत्वादन्यस्याश्वोत्पत्तौ कारणसम्भवान्मूलाभावेन भ्रमसंशयाग्रह्मणानामपि विदुषोऽनुपपत्तिरित्यर्थः। विद्योत्पतौ मा भूदविद्या कर्म तु भविष्यति विदुषोभपि व्याख्यानभिक्षाटनादिदर्शनादित्याशङ्कयाह । चोदनाप्रयुक्तानुष्ठानं हि कर्म ज्ञानेन सह तव समुच्चिचीषितं ब्रह्मात्मैकत्वं तु साक्षातदनुभवतो न चोदना सम्भवति। कामाभावात्कामिनो हि सर्वाश्चोदनाः। अकामिनः क्रिया काचिद् दृश्यते नेह कस्यचिद् ।

यद्यदि कुरुते जन्तुस्ततत्कामस्य चेष्टितमिति स्मरणात्। विद्वच्छरीरस्थितिहेत्वविद्यालेशाश्रयकर्मशेषनिमित्तं तु विदुषो भिक्षाटनादि न कर्म चोदनाभावात्किन्तु यावत्प्राणशरीरसंयोगभावि तत्कर्माभासं तच्च विद्वान्न स्वगतं मन्यते कर्माध्यासोपादानाविद्याया असम्भवान्नैव किञ्चत्कोमीति प्रत्ययाच्चेति भावः। यदुक्तममृतत्वं किं न गृह्यते विद्याशब्देन च परमात्मविद्येति तत्राऽऽह्म। मुख्यामृतत्वग्रह्मणे हिरण्यादिमन्त्रेण द्वारमार्गयाचनमनुपपन्नं स्यात्। न तस्य प्राणा उत्क्रामन्त्यत्र ब्रह्म समश्नुते इत्यादिश्रुतेः। ततो मुख्यार्थबाधाद् गौणार्थ ग्रह्मणं युक्तमित्यर्थः। यस्मादर्थान्तरं न सङ्गच्छते तस्मादित्युपसंहारः॥

तृतीयो विरामः

कर्मपरिभाषा

नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।

अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥

उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनन्तथा ।

प्रसारणञ्च गमनं कर्माण्येतानि पञ्च च ॥[१]

कर्म विभजते उत्क्षेपणमिति । कर्माणिपञ्च । कानि तानि ।

उत्क्षेपणादीनीत्यर्थः । तत्र उत्क्षेपणं उत्क्षिपामीतीच्छेयादवापातनम् । उपक्षेपणमअपाक्षिपामीतिच्छायाऽधः पातनम् । आकुञ्चनम् अङ्गुल्यादीनां सङ्कोचसम्पादनम् । प्रसारणं सङ्कुचितस्य विस्तृतिसम्पादनम् । गमनमेतच्चतुष्ट्यभिसन्नं देशान्तरसंचारादिरूपम् । एतेषां पञ्चाना कर्मत्वजातिमत्वं संयेगभिन्नत्वे सति संयोगसमवायिकारणत्वं वा सामान्यलक्षणं । अत्रापि पञ्चत्वं न संख्या बाधात् किन्तु प्राग्वद् बोध्यम् ॥

---

१ - न्याय सिध्दान्त कारिकावलि ॥६॥

भ्रमणं रेचनं स्पन्दनोदर्वज्वलनमेव च ।

तिर्यगमनमप्यत्र गमना देव लभ्यते ॥[१]

ननु भ्रमणादीनामपि सत्वात्कथं पञ्चैव कर्माणि तत्राह भ्रमणमिति। चक्रादौ तिर्यक् संयोगादिजनकानां भ्रमणादीनामुक्त चतुष्टयभिन्नत्वाद् गमनएवान्तर्भाव इति भावः ॥

कर्म परिभाषा :-

तद् विषये एतावत् पर्यन्त मपि सिद्धान्त प्रदर्शयति यज्ञ तप व्रत उपवास तीर्थस्नान दान जप नियम पृथिव्या परिक्रमा पुराण श्रवण पुण्योपदेश गुरुदेवताराधना स्वधर्माचरण अतिथि सत्कार ब्राह्मणानां पूजनम् एवं विशेषतया ब्राह्मणभोजनम् इत्यादि विविधै सत्कर्मभिरपि दुष्कर्मणां विनाशो भवति। ब्राह्मणेभ्यो यद् दत्तं भवति। तत मयि भगवते श्रकृिष्णे समुपलब्धं भवति। यतोहि ब्राह्मणः क्षेत्र स्वरूपः एवञ्च दानं च बीज रूपं भवति। किन्तु केषांचित् सत्कर्मणां फलेन लोकः स्वर्ग लभते किन्तु मोक्ष लाभः नास्ति कर्मणां फलम् यतोहि ।

---

१ - न्याय सिध्दान्त

ऋते ज्ञानान्नमुक्तिः ॥गीता॥ अपि च ज्ञानं कर्मणां फलम् भवति।

तस्मात् एवो लिखितम्

फलस्य कारणं पुष्प फलात् पुष्पं विनश्यति।

ज्ञानस्य कारणं कर्म ज्ञानात् कर्म विनश्यति॥

सिद्धान्तोऽयं लोक विश्रुतः एवास्ति। पुण्यकर्मभिः स्वर्गलाभः दुष्कर्मभिः नरक निपातः तथा कुत्स्ति कर्मभिः रोगाक्रान्तता नीचयोनिषु परिभ्रमञ्च निश्चप्रचमेवास्ति । तदनन्तरं एव पूतो भवति।पूतो भूत्वो मां प्राप्नोति।

श्रुति मतानुसारेण कर्मणां विपाकोऽति दुष्करो भवति। विषयोऽस्मिन् चतुर्षु वेदेषु भिन्नं भिन्नं इमं प्रदर्शितमस्ति।

नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि।

अवश्यमेव भोक्तव्यं कर्म शुभाशुभम्॥

कल्पकोटि शतैरपि यद भुक्तं कर्म भवति तन्न क्षीयते किन्तु शुभं वा अशुभं कृतं कर्म अवश्यमेव भोक्तव्यं भवतीति सिद्धान्तः। तीर्थानां देवानाञ्च सहायैन किञ्चिद् मानवस्सहयोगे लभते किन्तु हे तात ये मद् विमुखां सन्ति तस्य तु निश्चप्रचमेव तत् कृतं प्रायश्चित्तमपि न पवित्रं करोति यथा नद्यः मद्य घटं न पावयन्ति।

अत्र कर्मणां विभागं प्रदर्शयति दुष्कर्म नामकं किञ्चिद् कर्म भवति तथा नामकं अपि भवति कर्म। तत्र शब्दतः एवार्थो भेदो भवति यतोहि - दुष्टं कर्म दुष्कर्म भवति तथा कुत्सितं निन्दितं कर्म कुकर्म भवति। अतएव शुभकर्मभि र्न खलु नष्टं भवति दुष्कर्म अपरञ्च दुष्कर्मभि सुकर्मणामपि नाशो न भवति।

चतुर्थो विरामः

कर्म भेदाः

द्विविधं कर्म वैदिकम् ।

सुखाभ्युदयिकं चैव नैश्रेयसिकमेव च ।

प्रवृत्तां च निवृत्तं द्विविधं कर्म वैदिकम् ॥[१]

इह चामुत्र वा काम्यं प्रावृत्तं कीर्त्यते ।

निष्कामं ज्ञानपूर्वन्तु निवृत्त्मुपदिश्यते ॥[२]

प्रवृत्तां कर्म संसेव्य देवानामेति साम्यताम् ।

निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्चवै ॥[३]

---

१ मनु स्मृति अ-१२।८८ ॥

२ मनु स्मृति अ - १२।८९॥

३ मनु स्मृति अ-१२।९० ॥

पंचमोविरामः

कर्मविषये व्याख्या (भाष्यकाराणां मतम्)

दर्शनशास्त्रेषु वेदांत दर्शनम् मूर्धन्यं वर्तते। वेदांतशास्त्रमिदं अति प्रसिद्धं चास्ति। अस्मिन दर्शने प्रायेण सर्वेषां आचार्याणाम् मतं भाष्यं व्याख्यादिकम् च प्राप्यते। सांख्ययोगादि स्मृतिभिः सांख्यादि प्रयुक्तैः तर्कैस्य विरोधवेदांत समन्वयस्य परिवृत्तः। दर्शनान्तरम् वदस्यापि उपजीव्या उपनिषदाः एव। अस्याः अपि वेदांत संज्ञा अन्वर्था। भगवतः बादरायणस्य ब्रह्मसूत्रं वेदांतविषयकं एवस्ति। प्रसथानत्रयस्य भाष्य प्रसिद्धायार्यैः कृतम्। तत्र कमोपासनादि विषये तत्रैव स्वमतं प्रकटितम् इति। अत्र कर्म विषये भाष्यकाराणां किम् मतम्, कुत्र साम्यं-वैषम्यं च इत्यादिकम् सर्वम् निराक्रियते।

वेदांतशास्त्रे कर्मविषये महतीचर्चा कृताऽस्ति आचार्यैः एतद्पूर्वम् अत्र अन्येषां दर्शनामपि कर्मविषये अभिमतं उपस्थापितव्यम्। तत्र सांख्यदर्शने महर्षि कपिलस्य मतं एव पश्चादवर्तिनः सांख्याचार्याः अलिखन अस्मिन् दर्शने कर्मविषयकं विवरणं साख्यसूत्रेषु अन्येषु ग्रन्थेषु च प्राप्यते।

योगदर्शने :---

योगशास्त्रम् चिकित्साशास्त्रवत् चर्तुव्यूहं अस्ति। यथा --

1. रोगः
2. रोग हेतुः

3. आरोग्यं

4. भैषज्यम् इति व्यूहाः सन्ति।

तथैव योगशास्त्रे

1. संसारः

2. संसार हेतुः

3. मोक्षः

4. मेक्षहेतुश्च सन्ति।

अत्र दुःखत्वाद संसारः हेयः मन्यते।

अस्मिन् दर्शने अष्टौ अंगाकन स्वीक्रियन्ते। तत्र इमानि सम्यकरूपेण अनुष्ठीयमानानि मुमुक्षुणाम् बहुतरं उपकुर्वन्तु। तत्र हिंसा - सत्यं - अस्तेयं - ब्रह्मचर्यम् - अपरिग्रहश्चेत्यादयः सर्वे पालनम् जीवनस्य कमएव। कर्मोपरान्ते योगः प्राप्यते। योगादेव पामार्थिकं तत्वं उपलभ्यते। अविद्यादीनि स्लथयति कर्मबन्धनानि निरोधाभिमुखं च करोति चित्तं सा सम्प्रज्ञात् इति आख्याययते। संसारबीज भूतानां क्लेशकर्मासयानाम् च अत्र अभवत् एव निर्जीव समाधिः मन्यते। अनेन ज्ञायते क्लेशाः सन्ति। अपि चाध्ययनेन कर्माणि दग्धानि जायन्ते। अतस्तु योगशास्त्रे कर्म दग्धानि जायन्ते इति सिद्धान्तः।

न्यायदर्शने :---

कर्मणि पञ्चेव न्तु कर्मविषये वैशिष्ट्यं विवेचनं स्वातन्त्र्येण नैव प्राप्यते। वैशेषिकदर्शनास्यापि न्यायवदेव सिद्धान्तः वर्तते। मीमांसादर्शने

कर्मविषयिकी चर्चा महती वर्तते। एतद्दर्शनम् जैमिनीप्रणीतं वर्तते। अपि च वेदानां कर्मपरकार्थाः एव एते स्वीक्रियन्ते। कर्मस्य सर्वोपरि अस्ति। यागादिषु त्रियगादीनामधिकारः कर्मणि निर्वृर्त्तयितुं शक्तानामेवाधिकारः। न तिर्यज्जः शक्नुवन्ति कर्मणि निर्वर्तयितुम्। इत्यादिकं सतर्कविर्तकमुपपाद्यन्ते सिद्धान्त यन्ति तस्मात् मनुष्याणामेव शक्नुवतामधिकारः इति।

अपि च यागादिषु स्त्रीपुरुषयोरधिकाराधिकरणे लिंग विशेषात्पुरुषस्यैव तत्राधिकार इति पूर्वपक्षीकृत्य सूत्रयति --

''लिंगविशेषनिर्देशात् प्रयुक्तमैतिशयानः।''[1]

अस्मिन दर्शनक कर्मविषयकं विवरणं पदे-पदे प्राप्यते।

वेदांतदर्शने आचार्याणाम् कर्मविषये यानिमतानि भविष्यादि ग्रन्थेषु उपस्थापितानि तदत्र यथाक्रमं लिख्यते।

1.श्रीमच्छंकराचार्यमतम् :----

वेदांतसिद्धान्तस्य भाष्यकारेषु प्रथमः शिवगुरुसुतस्तैत्तिरीय- शाखाध्यायी स्वजन्मना मालावारप्रान्त केरलप्रदेश नम्बूद्रीब्राह्मण -कुलमञ्चकार। बाल्यकालादेवतीव तेजस्वी अलौकिकमेधा सम्पन्नः। अस्य प्रांतराध्ययस्य साक्षातसरस्वत्यवतारस्य जन्मः खैस्त 788 मितः निर्वाणकालश्च खैस्त 820 मितो विभाव्यते।

---

1. मीमांसा-6

अयं हि दाक्षिणत्यः तैत्तरीयशाखाध्यायी ब्राह्मणः आसीत्। अनेन भाष्यत्रयं अतिरिक्तं अपि बहवो ग्रन्थाः निर्दिष्टाः सन्ति। अनेकानि स्तोत्राणि च लिखितानि। शरीरिक नामकमभाष्यं ब्रह्मसूत्रस्य विरचितं। भगवतगीतायां तथोपनिषदां भाष्यात्मिकां टीकां लिखितवान अयं।

शंकराचार्यस्य जन्मकालविषये स्थितिकाल विषये च नानाविधविरोधोक्ति दर्शनात् यत वैभव्यं उपस्थितं। तथापि सर्वोषाम् आचार्याणां अयमेव प्रथमा आसीत्।

अस्याचार्यस्य मते कर्म त्रिविधं वर्तते।

1. नित्यकर्म
2. नैमित्तिक कर्म
3. संचितकर्म च।

कर्मणां विषये अस्य मतंमस्ति ज्ञायते 'ब्रह्मणि कर्मसमूहः विनश्यतिः' यावत् ब्रह्म ज्ञानं न जायते तावत् कर्म बन्धनमपि नैव मुच्चति जीवः। ब्रह्मसूत्रस्य भाष्यावसरे अनेकेषु स्थलेषु कर्मविषये चर्चा समुपस्थापिता आचार्येण।

शांकर सिद्धान्त नामकाः अयं सिद्धान्तः वर्तते। अत्र शांकरमते निर्विशेषं ब्रह्ममायोपाध्यवच्छिन्नं सद्यदा सविशेषब्रह्मत्वमुपैति तदा स ईश्वरोच्यते। अविद्ययोपाध्यवच्छिन्नं हि ब्रह्मैव ईश्वरपदभावभवतीतयर्थः। एष एवोश्वरो जगतः सृष्टिः स्थिति-लय-कारणत्वेनावधार्यते। स च सृष्टिव्यापारः ईश्वरस्य लीलाविलास मात्रः। एवं प्रकारेण विवेचनं तेन कृतम्।

अयं जीवः यावत् ब्रह्मज्ञानं न क्रियते तावद् कर्मानुबंधे भ्रमति। ''परास्य शक्तिविविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।''[1]

परमात्मनः शक्तित्रयं वर्तते। यथा --

1. ज्ञानभक्तिरूपेण।
2. बलशक्तिरूपेण।
3. क्रियाशक्तिरूपेण।

अत्र क्रियाशक्तिरूपेण च अत्र क्रिया शक्तेः आत्यन्तिको निराशः अशक्यः। अनेन कारणेन गीतायां अष्टादशाध्याये 59-60 श्लोकयोः व्याख्यां निर्दिष्टः।

तत्रैव न कश्चिद् क्षणमपि जातुतिष्ठत्यकर्मकृत।

कार्यते ह्यवशः कर्मसर्वः प्रकृतिजैर्गुणैः।।[1]

अस्मिन् चराचर विश्वं कश्चिदपि अकर्मकृत न भवितुमर्हति तर्हि कर्मणां परित्यागः कथं कर्तुम् शक्यते। तत्रैव आचार्येण विहित कर्मणां शास्त्रोक्तरीत्या परित्यज्य ब्रह्मज्ञानस्य आवश्यकता

---

1. श्वेता. उप. 6/8

2. गीता - 3/5

पदर्शिता। कर्मणां नाशः ब्रह्मज्ञानेन जायते। अस्मिनमते ब्रह्मानुभूतिपश्चाद् कर्मभावः यावद् स्वस्वरूप ज्ञानं न भवेत तावत् कर्मकारणानि प्रवृत्तानि जायन्ते। तत्रापि --

1. सात्विकम् कर्म
2. राजसं कर्म
3. तामसंकर्म।
4. कर्मणां
5. हेतुः पंच एव।

अद्वैतसिद्धान्ते ज्ञानादेन कर्मनाशः भवति। यतोहि आत्मनः अद्वैततत्वं, ब्रह्मस्वरूपं उपलभ्यते। विर्वतवादः क्षीयते आध्यक्षश्च परिगम्यते, अनेन अस्मिन् सिद्धान्ते 'सर्वम् खलुविदं ब्रह्म' इत्यस्य घोषः समुपलब्धः भवति।

शंकराचार्यस्य प्रायेण सर्वेषु ग्रन्थेषु ब्रह्मज्ञाने कर्मनाशः इतिराधान्तः उपलभ्यते।

2.श्रीरामानुजाचार्यमतम् :--

अयं आचार्यः द्वितीयः वर्तते। अस्य आचार्यस्य जन्मः पेरम्बुदूर नगरे अभवत्। श्रीयादवप्रकाशसकाशात् अध्ययनं अकरोत्। अस्य आचार्यस्य विशिष्टाद्वैत नामको सिद्धान्तः प्रसिद्धः वर्तते। अत्र त्रयएव पदार्थाः --

1. चित्त
2. अचित्त
3. ईश्वरश्च इति।

ईश्वरश्चिदचिच्चेति पदार्थत्रियम् हरिः।

ईश्वराश्चिदिति प्रोक्तो जीवो दृश्यमाचित्पुनः।।[1]

अत्र चित् भोक्ताजीवः, अचित् भोग्या प्रकृतिः ईश्वरश्च सर्वव्यापी सर्वज्ञः सर्वान्तरयामी च अस्ति।

त्रयाणां नित्यत्वेऽपि भोक्ता भाग्ययोः ईश्वरस्य आधीनता भवति। रामानुजस्य सिद्धान्ते प्रलयकाले चिदाचिदोसूक्ष्मरूप उत्पन्नतायां विशिष्टः ईश्वरः। कारणवस्थायां ब्रह्मपदेन उच्यते। सृष्टि अवस्थायां कार्यावस्थायां च ब्रह्म इति। यथा आत्मना शरीरं धार्यश्चमेत नियम्यते तत् कार्य निवृत्तिार्थम् प्रर्वत्यते। तथैव परमेश्वरेण चित अचिदात्मकं तत्वम् धार्यते सृष्टि करणाय मतं अस्ति प्रवर्तते।

कर्मविषये अस्याचार्यस्यमतं अस्ति यत् –भगवतःपरमेश्वरस्य अनुग्रहात जीवः संसार बन्धनात् विमुच्यमुक्तयैकल्पते। मुक्तिम् प्रतिकर्म सचिवः भगवतः अनुग्रहः एकहेतोः। वेदविहित कर्मानुष्ठानात् चित्त शुद्धिः, चित्तशुद्धौ ब्रह्मजिज्ञासा, ब्रह्मजिज्ञासायां भक्तिउदयः, भक्तिउदयात ब्रह्मप्राप्तिः। स एव मोक्षः कथितं च

''उभै परिक्रमितस्यस्वान्तस्य एकान्त भक्तियोगलभ्यः।''

न धर्मानिष्ठोऽस्मि न चात्मवेदी,

---

1. आलवन्दार स्त्रोत

न भक्तिमास्त्वाच्चारणरविन्दे।

अकिच्चनो नाऽन्यगतिः शरणं,

त्वत्पादमूलं शरणं प्रपद्ये।।[1]

अस्मिन मते ज्ञानकर्म समुच्चयं उभयं अत्र परामृशति। यथा- अद्वैतवादीनां मते कर्मनाशः ब्रह्मज्ञाने भवति तथा अस्मिन मते न जायते। अहि संहितायां उच्यते --

एवं संसृतिचक्रस्थे मृग्यमाणे स्वकर्मभिः।

जीवे दुःखाकुले विष्णोः कृपा काम्प्युजायते।।[1]

विशिष्टाद्वैत सिद्धान्ते मुक्तिवस्थायां ब्रह्मसारूप्यं भवति न तु ब्रह्मभावः। कर्मानुसारेण जीवस्य गतिः जायते। अस्मिन मते अनेकानि उदाहरणानि आचार्येण दत्तानि। कर्मविषये जीवः नास्ति स्वतन्त्रा ईश्वरकृप्या सतकर्म सत्यसंकल्पत्वम् च समाधिगच्छति इति।

3.श्रीनिम्बार्काचार्यमतम् :--

तृतीयोआचार्यः निम्बाकः वर्तते। अस्याचार्यस्य अपरनाम अंशनारायणः आसीत्। राधाकृष्णयोः युगलपूजकः प्रतीकश्च वर्तते। सनतकुमारस्य त्रेतायुग परमशिष्या प्रेमभक्त प्रचारकः नारदमुनिः आसीत्। नरदमुनिः इदं तत्वम् निम्बार्काय ददौ इति वृत्तम् अस्मि् सम्प्रदाये प्राप्तौ। अयमपि आचार्यः तैलंगब्राह्मणः आसीत।

1.अहिसंहिता

नियमानन्दः अस्य वास्तविकं नामासीत्। एकदा रात्रौ निम्बोपरिअर्तम् इति सूर्यं दर्शयामास तेन कारणेन निम्बार्काचार्यः प्रसिद्धोऽभवत्।

अयं आचार्यः बहूनि ग्रन्थान लिखितवान् ततः केचन ग्रनथाः अत्र प्रस्तूयन्ते --

1.ब्रह्मसूत्रभाष्यम् - वेदान्तपारिजाततसौरभ-नामकम् एकम्।

2.रहस्यषोडशी -इति द्वितीयम्।

3.वेदान्तकामधेनु -इति चास्ति तृतीयं तदीयं पुष्पम्।

एतदनन्तरम् कालवच्छेदेन 1500 ईसवीये वर्षे श्रीनिवासाचार्यो अस्य निम्बार्क भाष्यस्य वेदान्तकौस्तुभ नाम्नी टीका कृतवान्।

अनेन आचार्येण भेदाभेदासिद्धान्तः उपस्थापिता ज्ञानकर्म समुच्चयेन मुक्तिः न केवलेन ज्ञानेन मुक्तिः उदयः अपितु कर्म सम्मबलितेन एव भवति। आपाधिके रूपे निवृत्ते भेदभावः लीयते तस्मिन ली जीवः ब्रह्मणि अवस्थितिः मुक्तिः प्रपद्यते। यथा समुद्ररूपेण समुद्रतरंगयोः एकत्वम् तरंगरूपेण नानात्वम् तथैव अत्र तेन उक्तम् -

कार्यरूपेण नानात्वमभेदः कारणात्मना।
हेमात्मना यथाऽभदः कुण्लाद्यात्मना भिदा।।[1]

निम्बार्क सिद्धान्ते ब्रह्मजीवयकोः भेदा भेदत्वम् द्वैताद्वैत्यम् व स्वीक्रियते। अयं सिद्धान्तः भारतीय दर्शने अतीव प्राचीना वर्तते न

---

1. भ. भा. 1/1/14

केवलं शंकराचार्यत् अपितु बादरायाणातऽपि प्राक् भेदाभेद सिद्धान्त पोषकाः आचार्याः अभूवन्। तत्र आद्रलौमिः आस्मत्थ्यः इत्यादयः। कारणात्मनः जीवब्रह्मणोः ऐक्यं अभिनन्दात परम् कार्यात्मना उभयोः भेदः। यथा-कार्यरूपेषु कटककुण्डलादिषु कारणरूपस्य स्वरणस्य एकात्मातायां अपि कार्यरूपे भेदं कोनाम् निवारयेतुं समर्थः। जीव-ईश्वरयोः विषये अस्य सिद्धान्तः रामानुजासिद्धान्तस्य सदृशः।

जीवः कर्तृत्वे (कर्मविषये) स्वतन्त्रता भोगे च परतन्त्रतः ईश्वराधीनाः चेति। अयं निखिलकर्म सम्पादयति तथा प्रतिपत्ति द्वारा भगवद्अनुग्रहेन मुक्तिः प्राप्नोति इति भावः। कर्मविषये तु शास्त्रोचित कर्मणि स्वीकृतानि सन्ति। पुरुषोत्तमाचार्येण वेदांतरत्न मंजूषायाम् दशश्लोकी-इत्यस्मिन संदर्भे अस्य सम्प्रदायस्य विशदाव्याख्या सिद्धान्तविषये उपलब्धा भवति। अपि च सम्प्रदाये अस्मिन् अनेके आचार्याः अस्य सिद्धान्तस्य विवेचनम् कुतम् इति। कर्मज्ञानम् विना किञ्चिदास्ति इति।

4.श्रीमध्वाचार्यमतम् :---

द्वैतमतावलम्बी अयं आचार्यः प्रसिद्धः वर्तते। अस्य अपरनाम् आनन्दतीर्थ महाभागः आसीत्। एषयो मध्वः पूर्णबोधः पूर्णप्रज्ञः इति एतै नमभिः प्रसिद्धः। उडापीनामक नगरो प्रान्ते 1199 शतके अस्य जन्म अभूत। समस्ते भारतेदेशे नगरादनगरादानन्तरं, ग्रामात्-ग्रामातानन्तरम् पर्यटनं द्वैतमतस्य प्रचारं कृतवान्। अनेन आचार्येण अनेके ग्रन्थाः रचिता सन्ति तेषु प्रसिद्धाः --

1. ब्राह्मणसूत्रेषु–अणुभाष्यम्
2. ऐतरेय भाष्यम्
3. छान्दोग्योपनिषदि
4. केनोपनिषदि
5. बृहदारण्यकोपनिषदि

इत्यादिषु उपनिषत्सु भाष्यं भागवत निर्णयं अपि च विरचिताः। अस्मिन् सिद्धान्ते तु द्रव्य–गुण–कर्म–सामान्य–विशेष–विशिष्ट–अंशी शाक्त–सादृश्य–अभावा इति दश पदार्थाः अभिमताः। इमे पदार्थाः वैशेषिकपदार्थैः सह बहुत्र साम्यमविष्कुर्वन्तोऽपि नितरां माधवमतस्य वैशिष्ट्यं द्योतयन्ति। अत्र कर्मविषये विवेचनं इदं अस्ति।

कर्मऽपि त्रिविधं --

1. विहितकर्म।
2. निषिद्ध कर्म।
3. उदासीन कर्म।

तत्र उदासीन कर्मणः परिस्पछनात्मकरत्वं तत् अन्तर्भूतानि च उच्छेपेण अवच्छेपण आदिनि। नित्यनित्या भेदेन जाति उपाधि भेदेन च सामान्यं द्विविधं मन्यते। कर्माणि त्रिविधान भवन्ति।

अस्मिन् सिद्धान्ते विष्णुः ईश्वरः। स अनन्त गुणः, तसिमन् सजातीय'विजातीय उभै विधम् आनत्यम् भवति।

अस्य मत परमात्मशक्तिरेव लक्ष्मी सा च परमात्मनः अधीनः सत्यमपि ततः भिन्ना भवति। जीवः संसारी भवति। कर्मानुसारेण अनगुण्येन च सुख-दुःख भोक्ता जन्ममरणशीलश्च अस्ति। स च त्रिविधं। यथा ---

1. मुक्तियोग्यः।
2. नित्यसंसारी।
3. तमोयोगश्च।

नित्यसंसारी संसरणशीलः तमोयोग्यानां जीवानं चतुर्विधं स्वीक्रियते। यथा

1. दैत्यः।
2. राक्षसः।
3. पिशाचः।
4. अधमाश्च।

सर्वेऽपि अमी जीवः व्यक्तितः भिन्नाः।

अस्मिन् मते ब्रह्मणः चित्तं अंशं आदाय एव ब्रह्मणः जीवस्य ऐक्यमभिमतं परम तदेक्यं न वास्तविकं अनयोः अभेदः। यथा--

जीवस्य तादृशत्वं च चित्तामात्रं च चापरम्।

तावन्मात्रेण चाभासो, रूपमेषां चिदात्मनाम्।।[1]

---

1. म. सि. सार, पृ.-32

अस्मिन् संप्रदाये जीवस्य साधनासरणी तारतममयस्यप्रपञ्च भेदश्च ज्ञानमावश्यकम्। समस्त पदार्थेषु जगतः तारतम्य भेदाः स च पञ्च प्रकारकाः। तद्यथा --

1. ईश्वरस्य जीवात्मभेदः।
2. ईश्वरस्य जड़ादभेदः।
3. जीवस्यजड़ादाभेदः।
4. जीवस्यजीवान्तरात् भेदाः।
5. जड़स्य जड़ान्तरात् भेदश्चेति।

पञ्चविधस्य भेदस्य सम्यक् ज्ञानं अस्यमते मुक्तिसाधकं भवति। उपासना च द्विविधा --

1. संततशास्त्राभ्यासरूपा।
2. ध्यानरूपा च।

सापि अधिकारी भेदेन अनेक विधा परमा भक्तिः परमेश्वर अनुग्रहणेन ततः जीवः कर्मकर्तुम नेष्टेः। कर्मेण च ज्ञानोदयः ततः परमभक्तिः उत्पत्तिः। ततः ब्रह्मानुग्रहः ततः परममोक्षः।

मोक्षश्च चतुर्विधा --

1. कर्मक्षयः।
2. उत्क्रान्तिः।
3. अचिरादि मार्गः।
4. भोगः।

भोगश्च चतुर्विधा -- यथा --

1. भालोक्यः
2. सामीप्यः
3. सारूप्यः
4. सायुज्यः।

अयमेव मध्वसिद्धान्तस्य प्रमुखाः नियमाः उद्देश्यं च।

श्रीवल्लभाचार्यमतम् :---

वल्लभाचार्यस्य सिद्धान्तः शुद्धाद्वैत ामक5 वर्तते। अस्य आचार्यस्य जन्मः 1489 शतके अभवत्। अनेन आचार्येण विजयनगरादिधीसस्य श्रीकृष्णरावस्य राज्य सभायां आचार्य व्यासतीर्थस्य अध्यक्षतायां अद्वैतवादिनः पराजित्य लोकोत्तर विद्वत्तयाः परिचयोः आदाय। अस्य सिद्धान्त ग्रन्थः

1. ब्रह्मसूत्राणुभाष्यम्।
2. तत्वप्रदीप निबन्धः।
3. पूर्वमीमांसाभाष्यम्।
4. सिद्धान्त मुक्तावली इत्यादयाः।

अस्य आचार्यस्य सिद्धान्तः--

शुद्धाद्वैत ज्ञेयः समासः कर्मधारयः।

अद्वैतशुद्धयोः प्राहु षष्ठीतत्पुरुष बुधाः।।[1]

---

1. शुद्धाद्वैत्मार्तण्ड - 27

माया सम्बन्धरहितं शुद्धमित्युच्यते बुधैः।

कार्यकरणरूपं हि ब्रह्म शुद्धममायिकम्।।[1]

अस्मिन् सिद्धान्ते विशेषरूपेण पुष्टिमार्गः एव उच्यते। पुष्टि शब्दः अनुग्रहः वचनः (पोषणम् तदनुग्रह)[2] एते मन्यते।

यदस्ति मर्यादामार्गः पुष्टिमार्गयोः नितरो भेदाः। अस्मिन् मते जीवः तिरोहितः नन्दादि गुणः स्वमीश्वरः एव। स एव यदृच्छया मायया उद्वेलितः।

अस्मिन् समप्रदाये जीवः त्रिविधः। यथा --

1. शुद्धः।
2. मुक्तः।
3. संसारी च।

निम्बार्काधारेण जीवस्य भेदः अनेनपि कृतम्। जगतविषये परिणामवादः अस्य प्रसिद्धः अस्ति। भक्तिविषये कथयति।

द्विविधा भक्तिः --

1. मर्यादा भक्तिः
2. पुष्टिभक्तिः।

भगवत्चरणारविन्दु भक्तिः मर्यादाभक्तिः।

भगवतः मुखारविन्दु भक्तिः पुष्टि भक्तिः।

1.शुद्धाद्वैतमार्तण्ड - 28

2.भाग. 2/20

मर्यादा भक्ति द्वारा ब्रह्मण: भदेावबोध:। क्लेशादि लम्बलितात् जगत उद्धाराय पुष्अिमार्ग: एव अस्ति इति दृढ़ीयान विश्वास:।

अनेन आचार्येण प्रस्थान चतुष्टयी स्वीकृत:। यथा --

1. उपनिषद्।
2. गीता।
3. ब्रह्मसूत्रम्।
4. श्रीमद्भागवतम्।

अत्र कर्मविषये भागवतस्याधार: स्वीकृत:।अस्य सम्प्रदायस्य कथ्यते -

स्त्रियो वा पुरुष वाऽपि भक्तिभावेन केशवम्।

हृदि कृतवा गतिं यान्ति, श्रुतीनां नात्र संशय:।।

एवं प्रकारेण आचार्याणां दर्शनानाम् विषये मतं उपलभ्यते।

वेदमूलकानि एव निखिलानि दर्शनानि वेदयबृहमाणार्थम् एव च तेषां प्रवृत्ति:। शब्दत: अर्थतो वा प्रत्यवभाषमाने विसंवादेऽपि तत्तात्पर्यविषयीभूतेऽर्थे समानकारका च एव तानि पर्यवसन्ति। अतोऽन्ते सर्वाणि दर्शनानि आचार्याणां च मतं त्रिविध दु:खाय अत्यन्त निवृत्ति लक्षणे अत्यन्त पुरुषार्थे एव समन्वियन्ति लक्ष्यन्ते न तानि मात्रयाऽपि विरुध्यन्ते इति विवेक:।

वेद प्रतिपादित सिद्धान्तान् विषदयितुम् एवं आचार्यनाम् वेदान्ते प्रवृत्ति:। तत्-तत् सिद्धान्ताङ्गीकार एव सर्वेषाम् एकवाक्यता।

निष्कर्षतः कर्मविषये सर्वैः आचार्यैः विवेचनं वैविध्यं च निगदितम्। शंकराचार्य तः वल्लभाचार्य पर्यन्तम् कर्म सर्वैः स्वीकृतम् किन्तु अद्वैते ब्रह्मणि भूते सति ज्ञातेसति च कर्मनाशः। अन्येषां मते कर्माधारीकृत्यैव अपवर्गादिनाम् मोक्षादिनाम् च प्राप्तिः भवति इति।